This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

दाखलअंक	शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
M-2595	श्रीब्रह्मवैवर्त महापुराण	विष्णु श्रीः	पुराण	पूर्ण	-	3/12	92	संस्कृत	कागद	11	38		

॥श्रीगणेशायनमः॥श्री॥
॥अथ गणपतिखंड लि
॥ख्यते॥ विघ्नखंडस्य स
॥नु बापुभट्टेन लिखितं प
॥पत्र संख्या प्रमाण॥१२
॥ग्रंथसंख्या प्रमाण॥५

गखं॰
॥१॥

॥ श्रीगणेशाय नमः ॥ नारद उवाच ॥ श्रुतं ब्रह्मप्रकृतिखंडे तद्दुग्धार्णवमुत्तमं ॥ सर्वेषामीप्सितं
च मंगलदं कांतानयं दिनं ॥१॥ अधुना श्रोतुमिच्छामि गणेशखंडमीश्वर ॥ तज्जन्मचरितं च
णां सर्वमंगलमंगलं ॥२॥ कथं जातः सुरश्रेष्ठः पार्वत्या उदरे शुभे ॥ देवी केन प्रकारेण लेभे तादृशं सुतं ॥३॥
सर्वांशः कस्य देवस्य कथं जन्म लब्धवान् सः ॥ अयोनिसंभवः किं वा किं वासौ योनिसंभवः ॥४॥ किं वा
तद्ब्रह्मतेजो वा किं वान्येव पराक्रमः ॥ ज्ञातं पवपाच्य यच्छिं तानं किं वा तं निर्मितं परः ॥५॥ कथं तस्य
गुरुः प्रजा विघ्नेशत्वं जगत्त्रये च ॥ स्कंदेनाराधनेशं जो जगदीशोच विस्तरेणि ॥६॥ पुराणे श्रुति
सुतं च तज्जन्म परिवर्धितं ॥ कथं यागजन्मकोऽयमेकदंतो महेश्वरः ॥७॥ तत्सर्वं विस्तराच्च ब्रह्मन् श्रोतुं
कौतूहलं मम ॥ सुविस्तीर्णं महाभाग तद्वृत्तं च मनोहरं ॥८॥ श्रीनारायण उवाच ॥ शृणु नारद वक्ष्या
मि रहस्यं परमाद्भुतं ॥ पापसंतापहरणं सर्वविघ्नविनाशनं ॥९॥ सर्वमंगलदं सारं सर्वश्रुतिम
नोहरं ॥ सुखदं मोक्षबीजं च कर्ममूलनिकृंतनं ॥१०॥ दैत्यार्दितानां देवानां तेजोराशिसमुद्भवा ॥
देवी संहत्य दैत्यौघान् दक्षकन्या बभूव ह ॥११॥ सा च नाम्ना सती देवी स्वामिनो निंदया पुरा ॥ देहं

खंड॰
॥१॥

संसर्ज्ययोगेन जातान्यौ छ भ्रियोदरे ॥१२॥ स्कंदकराय ददौ तांच पार्वती [illegible] पर्वतोद्भवा ॥ तां गृहीत्वा
महादेवो जग्मनिजैनं भवं ॥१३॥ रात्र्यां रतिकरीं स्त्वा पुष्पचंदनचर्चितां सरे वनमर्मदातारे पुण्यो
धानेतथासह ॥१४॥ सहस्रवर्षपर्यंतं देवमानेन नारद ॥ तयोर्बभूव शृंगारं विपरीतादिकं परं ॥१५॥
दुर्गास्पर्शमात्रेण कामिनश्च शिवः तत्पर ॥ नर्षिता स्वाभिव स्पर्शहर्षधेनादिवानिशं ॥१६॥ हंसकारं
वाद्यैर्नैर्दुस्को किंकतश्रुते ॥ नानापुष्पविकसिते स्वयमेव धनिसंयुते ॥१७॥ दृष्ट्वा तयोस्तु शृंगारं चिं
तां प्राप्य सुराः परं ॥ अस्माकं च पुरस्तत्र सप्तवो नारायणाश्रमं ॥१८॥ तं नस्ताकृपवामास ब्रह्मा च तांत
पीडितं ॥ संतस्थुर्द्देवताः सर्वा अत्र भूत्वा तिष्ठकास्तथा ॥१९॥ ब्रह्मोवाच ॥ सहस्रवर्षपर्यंतं देवमाने
नरोत्तमः ॥ वसोरतश्च निश्चेष्टो नयो लिविरमामह ॥२०॥ मैथुनस्य विरामच्चंद्रपत्यो जगदीश्वरः ॥
र्द्धिभूताभविता पसंतन्य मैत्रि तु महीसि ॥२१॥ श्रीनारायण उवाच ॥ चिंता नास्ति जगन्नाथ सर्वमंगल
विभूति ॥ मयि ये शरणापन्ना नास्ति तेषां दुःखं कुतोपि वै ॥२२॥ येनोपायेन लब्धव्यं भवोपतत्तनिश्चितं ॥
तत्तु रक्ष प्रयत्नेन सार्द्धं देवगणैः सह ॥२३॥ पपात तत्र भीरुवर्यैतस्यां सा उदरे यहि ॥ ततो पत्नं च तायि
तां सुतां सुरयिमर्द्दकं ॥२४॥ तत्रागत्य सकपदः सर्वे सुरा नारायणादयः ॥ प्रपद्य र्न महात्तारि यथो ब्रह्मा मि

[illegible]

तत्रैव पर्वतश्रेष्ठे विबुधा हिंदुर्दैत्यो सुराः उरगा विषण्णवदनाः सर्वे विष्णु भयविकातराः ॥२६॥ नाकउ० ॥
कुबेरस्त्वमितो गच्छ कुबेरो वरुणं तथा ॥ भास्करं स्वं दृष्टेवा निश्चिंद्रमेवञ्च भास्करः ॥२७॥ एवं देवा प्रेरयंती
देवांश्चरतिभंजने ॥ हरस्यं गौरभांगं च कुर्वन्तं ह्यपरस्परं ॥२८॥ हरिस्ततो वै गिरशं श्राक्रोचा २
च महेश्वरं ॥ इंद्रउ० ॥ किं करोषि महादेव योगीश्वर नमोस्तु ते ॥२९॥ जगद्धीराज गद्धीज भक्तानां
भयभंजन ॥ हरजगन्निवासतेवमा जगाम च भास्करः ॥३०॥ संवीक्ष्योवाच द्वारस्थो भयान्नेत्रवक्र
च कुणा ॥ सूर्यउ० ॥ किं करोषि महादेव जगतां परिपालक ॥३१॥ सुरश्रेष्ठ महाभाग पार्वतीश नमोस्तुते ॥
इत्येवमुक्त्वा श्रीसूर्यः प्रजगाम भयातुरः ॥३२॥ आजगाम तथा चंद्र उवाच च कलंकधरः ॥ चंद्रउ० ॥ किं
करोषि त्रिलोकेश त्रिनेत्र नमोस्तुते ॥३३॥ स्यारोलोपः पर्णधामः पुण्यश्रवणकीर्तनः ॥ इत्येवमुक्त्वा
शीतरश्मि चिरराम निशापतिः ॥३४॥ समीक्ष्योवाच द्वारस्थोऽस्य यमेव समीरणः ॥ पवनउ० ॥ किं करो
षि जगन्नाथ जगद्वंद्योन मोस्तुते ॥३५॥ धर्मार्थकाममोक्षाणां बीजरूपं सनातन ॥ इत्येवं स्तवनं श्रुत्वा
योगज्ञानविशारदः ॥३६॥ वल्कुकामोमानतुस्वान्यष्टं गौरं पार्वती भयातुर ॥ ह्यासुरान्सोपानीं श्रियपुनः
स्तोत्रेण मुपतान्र ॥३८॥ विजहौ सुखसंभोगं कं ठवमंस्य पार्वती ॥ उत्तिष्ठतो महेशस्य तत्र स्तस्य चलितस्य च ॥

॥२॥

ऽक्रमोपमा ततद्वीर्यं ततः स्कंदोपि दृष्टवान् ॥ पश्चात्तं च पयसि विकृत्य भामती मनोहरं ॥ ३९ ॥ स्कंदजन्मैवं सिंधेवसां प्र
प्रतं वांछितं शुभ ॥ गणेशस्कंदश्रवणं तं मोक्षं भविष्यति ॥ ४० ॥ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे ना
रायणनारदसंवादे गणपतिखंडे प्रथमोध्यायः ॥ १ ॥ श्रीनारायण उवाच ॥ सत्कारं तं महादेवो देवर्षीपुर
तः सुखान् ॥ पप्रच्छ पथ्यमिस्त्र वाच हरप्रपा पार्वती सभात् ॥ २ ॥ तस्मात् दुःखाया सा दुर्गा निचद्दध्यौ पुरः सुखान् ॥
सुपुष्टिं तं कोपवह्निं शामयामास देहत ॥ ३ ॥ अथ प्रभृति ते देवाश्च वीर्याभिवंति हि ॥ शशाप देवी तान्देवा
न्ति क्षांति वै भ्रष्टवह ॥ ४ ॥ ततः शिवः शिवां दृष्ट्वा क्रोधसंरक्तलोचनां ॥ रुदतीं नम्रवदनां लिखंतिं धरणीतले
॥ ५ ॥ शिवस्तां दुःखितां दृष्ट्वा बोधयामास वक्षसि ॥ अतीव प्रीतः संन्यस्त बुवाच मधुरं वचः ॥ ६ ॥ शंकर उ ॥ कथं
रुद्दासि प्रिये श्रेष्ठे कन्ये धन्ये मनोहरे ॥ नमः सौभाग्यरूपे च प्राणाधिष्ठात्रदेवते ॥ ७ ॥ किं ते प्रिये हं करिष्यामि व
द मां जदें गंभिके ॥ अत्सांउ संथे विशिवलौकि मसाध्य मित्रवचौः ॥ ८ ॥ अहो शिवर वराधं मां प्रसन्ना भव सुंदरि ॥
देवा दृष्टान देपस्य शांतिं मे कर्तु महसि ॥ ९ ॥ स्वपादुकेः शिवोहं च सर्वे वांछितदायकः ॥ सर्वाविनान हीश
श्वरा वतुष्टः शिवः सदा ॥ १० ॥ [illegible]ति सर्व च बुद्धि स्वं त्वानि स्संच क्षमा दया ॥ तुष्टि पुष्टिश्च तथा शुष्टि शांति
स्त क्षांतिरेव च ॥ ११ ॥ श्रुत्वंतद्दुत पानिद्राश्रद्धातंद्रा सुरेश्वरी ॥ सर्वाधारस्वरूपा च सर्वबीजस्वरूपिणी ॥ १२ ॥

८+देवाः प्रजाहृता भीताः पार्वतीशापहेतुना ॥ ब्र
श्रीः ऽसर्वसंहर्त्री च रूपे पार्वती भयात् ॥१२॥+

पा०
।।३।।

स्मिन्सुर्वंच वह्यन्च : सा कृतं तस्य संशिवे ।। तस्योपदिष्टं यं दृष्ट्वं तेन जीवस्य मां प्रवं ।। १३ ।। शंकरस्य वचः श्रु
त्वा कोपयुक्ता च पार्वती ।। उवाच मधुरं देवी हृदयेन विदूयता ।। १४ ।। पार्वत्युवाच ।। धिक्स्वहं रूपविद्याभिः सर्व
ज्ञे सर्वरूपिणं ।। स्वात्मारामम पूर्णकामं सर्व देहेषु च स्थितं ।। १५ ।। कामिनीमनसः कामदप्राप्तुं स्वामिनं च
हितं ।। सर्वेषां हृदयस्थं च हृदीश्वर वकामिकी ।। १६ ।। सुतोत्पत्ति सर्व नारीणां लज्जाजनक कारणं ।। अक
थ्यमपि सर्वासां तथापि कथयामि च ।। १७ ।। सुरेषु मध्ये स्त्रीणां च विसर्वेषु सुरेश्वर ।। सत्सु सासहस्रं भोगोपि
जीने पुत्र संसुख ।। १८ ।। सहस्रं मेनेच दुःखं च तत्समं नास्ति च वाह्यवः ।। कांतानां कांतविच्छेदः शोकः परमदारुणः ।। १९ ।।
हृत्कंपसेपथाच्चेदः क्षीयमानो दिने दिने ।। तथा कांत विना भ्रांता स्त्रीणां कांतक्षणेक्षणे ।। २० ।। चिंता च्चरश्च
सर्वे बापुपताप च्छ्वासस्ता ।। साध्वीनां कांत विच्छेदः सुरमणां च मैथुनं ।। २१ ।। रतिभंगो दुःखमेकं द्वितीयं वी
र्यपातनं ।। दुःखातिरेकदुःखं च तृतीयमनपत्यता ।। २२ ।। त्रैलोक्यपकांतं कांतं संलब्ध्वा लब्धमनो दुःखं ।।
या स्त्री पुत्र विहीनानां च जीवनं तद्वसार्थकं ।। २३ ।। जन्मांतर सुखं पुण्यं तपो दानसमुद्भवं ।। सद्वंशजात पुत्रश्च
परत्रेह सुखप्रदः ।। २४ ।। सत्पुत्रः स्वामिनोरांश स्वामितुल्य सुखप्रदः ।। कुपुत्रश्च कुलांगारो मनस्तापाय
केवलं ।। २५ ।। स्वामिस्वंशे स्वं ने स्त्रीणां गर्भे जन्म लभेद् ध्रुवं ।। साध्वीस्त्री पातस्तु व्याच सततं हितकारिणी ।। २६ ।।

१ सं

।।३।।

असाध्वीवैवितुल्याचयश्चाध्यसंतापहारिका ॥ दुःस्वप्नदुःखापोविदुषान्नेवसाध्वीविनिःसृता ॥२७॥ ह्रिमुपा
यंकृत्वामिवदयोगीश्वरेश्वरः ॥ उपार्धसिद्धतपसांसर्वेषांचसुखप्रदः ॥२८॥ इत्युक्तापार्वतीदेवीनत्वा
नत्वानभश्चरः ॥ प्रसस्यशंकरोदेवोबोधयामासपार्वतीं ॥२९॥ ससुत्रवीतंसुस्वप्नंसंतापनाशकारकं ॥ मितं
स्निग्धंहिसुचिरंप्रवक्तुमुपचक्रमे ॥३०॥ विद्यार्थीलभतेविद्यांधनार्थीलभतेधनं ॥ पुत्रार्थीलभ
तेपुत्रान्कन्यार्थीलभतेसुतां ॥३१॥ अश्वमेधसहस्राणिकन्यादानस्ययत्फलं ॥ तत्फलंलभतेनूनंगणेश
स्यकथानकं ॥३२॥ यत्फलंभूमिदानस्ययत्फलंधान्यदानकं ॥ तत्फलंलभतेनूनंगणेशस्यकथानकं ॥३३॥
गोभूतिलहिरण्यानांवासोधान्यंगुडानिच ॥ रौप्यंलवणमिक्षूणांश्रवणे[illegible]चतत्फलं ॥३४॥ यत्तीर्थं
चयत्पुण्यंतत्तंयद्देवतालयं ॥ तत्फलंप्राप्यतेनूनंगणेशाश्रवणेनच ॥३५॥ काशीयात्रांचयत्पुण्यंयत्पुण्यंमा
तृश्राद्धकं ॥ पितृश्राद्धेचयत्पुण्यंतत्पुण्यंश्रवणेनच ॥३६॥ कन्यादानंसहस्रस्यकोटिलिंगस्ययत्फलं ॥
रंपा तत्फलंपितृमातृणांकोटिप्राप्यतितत्फलं ॥३७॥ द्विजस्यभोजनंलक्षंश्रवणेनचतत्फलं ॥ ददातिश्रुत्वा
नंयत्तत्फलंश्रवणेनच ॥३८॥ गणेशस्यश्रवणंगृहेकुर्वंतियेनराः ॥ तस्यपुण्यस्यकीर्तिंयोनालंव
क्तुंचतुर्मुखः ॥३९॥ पुराणश्रवणंकुर्यात्त्रिसंकुर्वंतियेनराः ॥ तस्यगेहेस्थिरालक्ष्मीर्भविष्यतिनसं

ध्यायः ॥४०॥८०॥ इति श्रीब्रह्मवैवर्त्तपुराणे नारायणनारदसंवादे गणपतिखंडे द्वितीयोध्यायः ॥२॥ श्रीमहा
देव उ० ॥ शृणु पार्वति वक्ष्यामि तव भद्रं भविष्यति। उपायतः सर्वसिद्धिर्भवेद्यजनत्रये ॥१॥ सर्वेषांच सि
सिद्धस्य बीजरूपं सुमंगलं। मनसः प्रीतिजननं सुपापंक्षयपामि ते ॥२॥ हरेराधनं हत्वा व्रतं कुरु वरान
ने ॥ व्रतं तस्य पुण्यकं नाम वर्षमेकं करिष्यसि ॥३॥ मलधकठोर बीजं च वांछाकल्पतरुं परं ॥ सुखदं पुण्यदं सा
रं पुत्रदं संपद्प्रदं ॥४॥ नदीनां च यथा गंगा देवानां च हरिर्यथा ॥ वैष्णवानां यथाहं च देवीनां च यथा प्रिये ॥५॥
आश्रमाणां यथा विप्रस्तीर्थानां पुष्करो यथा ॥ पुष्पाणां पारिजातं च पत्राणां तुलसी यथा ॥६॥ यथा पुण्यप्रदा
नां च तिथिरेकादशी स्मृता ॥ रविवारश्च वाराणां यथा [illegible] पुण्यप्रदः शिवे ॥७॥ मासानां मार्गशीर्षश्च ऋतू
नां माधवो यथा ॥ संवत्सरो वत्सराणां युगानां च कृतं यथा ॥८॥ वृंदावनं वनानां च शतरूपा च योषितां ॥
यथा काशी पुरीणां च सूर्यस्तेजस्विनां यथा ॥९॥ यथेंदुः सुखदानां च सुंदराणां च मन्मथः ॥ सुकवीनां य
था शुक्रः काव्यानां च पुराणकं ॥१०॥ श्रीमतां समुद्रश्च यथा लक्ष्मीश्च मावतां ॥ शाखानां च यथा मुक्तिर्हि
रस सिद्धिश्च संपदां ॥११॥ पक्षिणां च वैनतेयश्च वर्णानां प्रणवो यथा ॥ विष्णुमंत्रश्च मंत्राणां बीजानां प्रकृतिर्य
था ॥१२॥ विदुषां च यथा वाणी गायत्री छंदसां यथा ॥ यथा कुबेरो यक्षाणां सर्पाणां वासुकिर्यथा ॥१३॥ य

४ सूक्ष्माणां परमाणुकः ॥ भक्तानां च यथा रुक्मांगः +४

था पितामहो लोकानां गवां च सुरभिर्यथा ॥ वेदानां सामवेदश्च तृणानां च यथा कुशाः ॥१४॥ सुखदानां
यथा लक्ष्मीः पवनश्च शीघ्रगामिनां ॥ अक्षराणां यथाकारश्च हितैषिणां यथा पिता ॥१५॥ शालग्रामश्च यंत्रा-
णां स्तोत्राणां विष्णुपंजरः ॥ चतुष्पदानां पंचास्यो जीवानां मानवो यथा ॥१६॥ यथा स्थाल भिंदूपा-
णां मंदाग्निश्च रुजां यथा ॥ महावृक्षस्थूलानां च चक्राणां च सुदर्शनं ॥१८॥ नराणां श्रीरामचंद्रश्च वीरा-
णां लक्ष्मणो यथा ॥ सर्वाधारः सर्वसेव्यः सर्वबीजं च सर्वदः ॥१९॥ सर्वसारो यथा ह्येषो व्रतानां पुण्यदं यथा ॥
व्रतं कुरु महाभागे त्रिषु लोकेषु दुर्लभं २० सर्वसारश्च पुत्रस्ते व्रतादेव भविष्यति व्रतैराराध्यः श्रीकृष्णः
सर्वेषां वांछितप्रदः ॥२१॥ जनो यस्तेन नामुक्तः पितृभिः कोटिभिः सह हरिमंत्रप्रदाताय हरिसेवां करो-
ति यः ॥२२॥ भारते जन्म सफलं स्वात्मनः सकरोति च उद्धृत्य कोटिपुरुषान्वैकुंठं याति निश्चितं ॥२३॥ श्री-
दत्वा पार्वति धन्या सुखं तत्रैव मोदते ॥ सहोदरान्स्य भक्तांश्च स्वबंधून्सहचारिणी ॥२४॥ स्वस्त्रियं पंच स-
मुद्धृत्य भक्तो याति हरेः पदं ॥ तस्मात्कृत्वा हि द्विजे हरेर्मंत्रं सुदुर्लभं ॥२५॥ जपमंत्रं व्रते तत्र पितॄणां मु-
क्तिकारणं ॥ इत्युक्त्वा शंकरो देवो गत्वा गिरिजया सह ॥२६॥ श्रीशैले जाह्नवीतीरे हरेर्मंत्रं मनोहरं ॥ त-
स्यै ददौ च संप्रीत्या कवचं स्तोत्रसंयुतं ॥२७॥ एवं व्रतविधानं नियमं कथयामास तां मुने ॥ गणेशाराधनं
नित्यं कृत्वा मोक्षं भविष्यति ॥२८॥१०८॥ इति श्री ब्रह्मवैवर्ते म॰ पु॰ नारायणनारदसंवादे गणपतिखंडे स-

४+ वल्लीनां च यथा द्राक्षा रत्नं शालिक्ष मलयं यथा ॥१७॥+

[illegible] ॥२३॥

नारायण उ० ॥ श्रुत्वा व्रताभिधानं च दुर्गा प्रहृष्टमानसा ॥ सर्वं व्रतविधानं च संपृष्टुमुपचक्रमे ॥१॥ पा
र्वत्यु० ॥ सर्वव्रतविधानं च वद देव दयासागर ॥ हे नाथ करुणासिंधो दीनबंधो परात्पर ॥२॥ कानि व्रतोप
युक्तानि द्रव्याणि च फलानि च ॥ समयं विधिमंत्रं भक्ष्यविधानं तदर्हं तं प्रभो ॥३॥ दक्षिणासंविमितानि पुस्तं
संस्तु रोहितं ॥ पुष्पोपहारान्विप्रांश्च द्रव्याहरणं किं द्रुमान् ॥४॥ अन्यानि योपयुक्तानि यममा ज्ञातानि यानि
च ॥ संनियोजयतत्सर्वं स्त्रीणां स्वामिन्सर्वदः ॥५॥ पिताज्ञो मारकाले च सर्वपालनकारकः ॥ भर्त्ती मध्ये
सुतः शेषे त्रिधावस्था च योषितां ॥६॥ ततः पिता प्राणतुल्यां दत्तां तस्यापि ने सुतां ॥ स्वामी निवृत्तिमाप्नोति
सं[illegible]च सुतेभियां ॥७॥ वंधुत्रयंयुता या स्त्री सा च भाग्यवती परा ॥ किंचिद्धीना मध्यमा च सर्वहीनाध
मा श्रुतं ॥८॥ सर्वसौभाग्यवांस्त्वं च सर्वसाक्षी च सर्ववित् ॥ देहि मह्यं पुत्रवरं स्त्रीत्वमभिव्यक्तिकारणं ॥९॥ आ
सवो धान्तु मानेन महत्पनिनिवेदितं ॥ सर्वं तत्राभिप्रायतं वोधतं वोधयामि कं ॥१०॥ इत्युक्त्वा पार्वती प्रीसा
पपात स्वामिनः पदे ॥ कृपासिंधुश्च भगवान्प्रवक्तुमुपचक्रमे ॥११॥ श्रीमहादे० ॥ शृणु देवि प्रवक्ष्यामि वि
धानं नियमं फलं ॥ फलानि चैव द्रव्याणि व्रतोपयौगिकानि च ॥१२॥ विप्राणां ज्ञातव्यं शुद्धं फलं पुष्पोपहारकं ॥
धृकुराणां च ज्ञातव्यं द्रव्याहरणकारकं ॥१३॥ स्त्रीणां ज्ञातव्यं दक्षं निपुणत्वं च पुरोहितं ॥ सर्वव्रतविधानज्ञं वेदवे
दांगपारगं ॥१४॥ प्रवरं हरिभक्तानां सर्वज्ञं ज्ञानिनां वरं ॥ सनत्कुमारं मत्तुल्यं ग्रहाणव्रतहेतवे ॥१५॥ देवीं शुद्धे च का

ले च परं नियमपूर्वकं ॥ माघशुक्लत्रयोदश्यां भ्रतारं संस्मरन् प्रिये ॥ १६ ॥ गात्रं सुनिर्मलं कृत्वा शिरः संस्कारपूर्वकं ॥
उपोष्य पूर्वदिवसे वस्त्रं प्रक्षाल्य प्रयत्नतः ॥ १७ ॥ अरुणोदयवेलायां तल्पादुत्थाय सुव्रती ॥ मुखप्रक्षालनं कृत्वा स्ना-
त्वा च निर्मले जले ॥ १८ ॥ आचम्य प्रयत्नतः प्रतो हरिस्मरणपूर्वकं ॥ दत्वार्घ्यं हरये भक्त्या गृहमागत्य सत्वरं ॥ १९ ॥ धौ-
ते च वाससी धृत्वा उपविश्यासने शुचौ ॥ आचम्य तिलकं कृत्वा निर्वीप्य स्वान्हिकं पुरः ॥ २० ॥ गणेशपूजनं कु-
र्यादुपचारैः षोडशैः ॥ घटमारोपणं कृत्वा स्वस्तिवाचनपूर्वकं ॥ २१ ॥ नांदीश्राद्धं प्रकुर्वीत ब्राह्मणैः सहपूर्वकं ॥
वाजे वाजेति मंत्रेण विसृज्य मातृपूर्वकं ॥ २२ ॥ गणेशपुरायुतं ऋषीणां तर्पणेन च ॥ सपिंडकमपिंडं वा श्राद्धं कृ-
त्वा विधानतः ॥ २३ ॥ दुर्गामखेविह मंत्राणां पाखंवकुपश्च वर्जयेत् ॥ पुरोहितस्य वरणं पुरः कृत्वा प्रयत्नतः ॥ २४ ॥
संकल्प्य वेदविहितं व्रतमेतत् समाचरेत् ॥ व्रते द्रव्याणि नित्यान्युपचाराणि षोडश ॥ २५ ॥ देयानि नित्यं देवेशि
कृत्स्नाय परमात्मने ॥ आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकं ॥ २६ ॥ मधुपर्कं च स्नानीयं वस्त्राणि भूषणानि च ॥
सुगंधी धूपधूपं च दीपं नैवेद्यचंदनं ॥ २७ ॥ यज्ञोपवीतं तांबूलं कर्पूरादिसुवासितं ॥ द्रव्याण्येतानि पूजायाश्चां-
गरूपाणि सुंदरि ॥ २८ ॥ देवी किंचिद्धीनेनंचांगहानिः प्रजापते ॥ अंगहीनं च यत्कर्म चांगहीनोपयानरः ॥ २९ ॥
अंगहीने च कार्ये च फलहानिः प्रजापते ॥ अष्टोत्तरशतं पुष्पं पारिजातस्य विष्णवे ॥ ३० ॥ देयं प्रति दिनं दुर्गे स्वा-
मिनो रूपहेतवे ॥ स्वेतचंपकपुष्पाणां लक्षमक्षतमीप्सितं ॥ ३१ ॥ प्रदेयं हरये भक्त्या वर्णसौंदर्यहेतवे ॥ सहस्र-
पत्रं पद्मानामक्षतं पुष्पलक्षकं ॥ ३२ ॥ भक्त्या देयं च हरये सुखसौंदर्यहेतवे ॥ नीलोत्पलानां लक्षं च देयं कृष्णाय
भक्तितः ॥ ३३ ॥ व्रतांगभूतं देवेशि चक्षुषो रूपहेतवे ॥ हिमालयोद्भुतं लक्षं रुचिरं स्वेतचामरं ॥ ३४ ॥ प्रदेयं केशा-

वायेव केशसौंदर्यहेतवे ॥ अमूल्यरत्नरचितं दर्पणानां सहस्रकं ॥३५॥ देयं नारायणायैव भालसौंदर्यहेतवे ॥ मुक्ताफला
नां लक्षं च दंतसौंदर्यहेतवे ॥३६॥ देयं गोलोकनाथाय शीलजे अमक्तिप्रवर्धकं ॥ रत्नमंडकलक्षं च गंडसौंदर्यहेतवे ॥३७॥
महीश्वरायदातव्यं प्रतेश्रीलेन्द्रदुकूल्यके ॥ रत्नपात्रकलक्षं च देयं प्रसेश्वरायच ॥३८॥ औषधं स्थूलरूपाय प्राणेशि
भक्तितोऽर्पिते ॥ रत्नभूषणलक्षं च रत्नसारविनिर्मितं ॥३९॥ देयं सर्वेश्वरायैव कर्णसौंदर्यहेतवे ॥ माध्वीककलशा
नां च लक्षं रत्नविनिर्मितं ॥४०॥ देयं विश्वेश्वरायैव करसौंदर्यहेतवे ॥ सुधापूर्णाश्च कुंभानां सहस्रं रत्ननिर्मितं ॥४१॥
देयं हरये देवैशिवाय च सौंदर्यहेतवे ॥ धत्तूरकुसुमाकारं रत्नपात्रसहस्रकं ॥४३॥ देयं गोरक्षकायैव गलसौंदर्यहेत
वे ॥ सद्रत्नसाररचितं पद्मनालसहस्रकं ॥४४॥ देयं स्वर्णकपोलाय बाहुसौंदर्यहेतवे ॥ लक्षं च रत्नपद्मानां करसौंदर्य
हेतवे ॥४५॥ देयं गोवागनेत्राय नारायणहरिप्रते ॥ अंगुलीयकलक्षं रत्नसारविनिर्मितं ॥४६॥ अंगुलीनां च रूपा
यं देयं देवेश्वरायच ॥ मणीन्द्रसारलक्षं च श्वेतवर्णं मनोहरं ॥४७॥ देयं मुनीन्द्रनाथाय नखसौंदर्यहेतवे ॥ सद्रत्नसार
हाराणां लक्षं चातिमनोहरं ॥४८॥ देयं मदनमोहाय वक्षःसौंदर्यहेतवे ॥ सुपक्वश्रीफलानां च लक्षकं सुमनोहरं ॥४९॥ देयं
सिद्धेंद्रनाथाय स्तनसौंदर्यहेतवे ॥ सद्रत्नवर्तुलाकारं पात्रलक्षं मनोहरं ॥५०॥ देयं पद्मालयेशाय देहस्यसुरूपहेतवे ॥ सद्र
त्नसाररचितं नालीनां च सहस्रकं ॥५०॥ प्रदेयं पद्मनाभाय नालीसौंदर्यहेतवे ॥ सद्रत्नसाररचितं रथचक्रसहस्रकं ॥५१॥
नितंबसौंदर्यार्थं च प्रदेयं चक्रपाणये ॥ सुवर्णरंभास्तंभानां लक्षं च सुमनोहरं ॥५२॥ प्रदेयं श्रीनिवासाय श्रोणिसौंदर्य
हेतवे ॥ शातपत्रस्थलाब्जानां लक्षमम्लानमक्षतं ॥५३॥ प्रदेयं पद्मनेत्राय पादसौंदर्यहेतवे ॥ सुवर्णरचितानां च खंजना
नां सहस्रकं ॥५४॥ चक्षुःसौंदर्यहेत्वर्थं देयं लक्ष्मीश्वरायच ॥ राजहंससहस्रं च गजेंद्राणां सहस्रकं ॥५५॥ सुवर्ण
रचितं देयं हरये गतिहेतवे ॥ सुवर्णछत्रलक्षं च देयं नारायणायच ॥५६॥ चित्रितं रत्नसारेण मूर्ध्नःसौंदर्यहेतवे ॥

६+ रत्नप्रदीपलक्षं च गोपवेषविधायिने ॥४२॥ देयं
किशोरवेषाय दृष्टिसौंदर्यहेतवे ॥ ६+

मालतीनां च कुसुमं प्रशस्तं परमेश्वरि ॥५७॥ दर्पणं [illegible] यवमिश्रा च हास्यसौंदर्यहेतवे ॥ अमोघप
रत्नं च कांस्यं च देयं नानारूपप्रणाय वै ॥५८॥ स्नानं तैलं घृतं प्रणादं धर्मं च सौंदर्यहेतवे ॥ स्व च स्फटिकं संप्रदेयं पल
सारसहस्रकं ॥५९॥ देयं सुनीं द्रव्यानापाय नासाक्षसौंदर्यहेतवे ॥ प्रवाल सारसंकाशं मणिसारसहस्रकं ॥६०॥
देयं तत्र पामरस्तस्य प्रत्रिपाकुरा [illegible] नवद्रव्ये ॥ माणिक्यसारलक्षं च देयं पद्मरागाय पतुतः ॥६१॥ जन्मनः
कोटिपर्यंतं स्यामि सौंदर्यहेतवे ॥ कूष्मांडनारिकेलं च पंचाशीतिश्रीफलं तथा ॥६२॥ फलान्येतानि देयानि हरवे
पुत्रहेतवे ॥ रत्नेंद्रसारलक्षं च देयं पद्मरागाय पतनतः ॥६३॥ असंख्यजन्मपर्यंतं स्यात्सनोधनवद्रव्ये ॥ पा
यं नानाप्रकारं च कांस्यताम्रादिकं परं ॥६४॥ घृतसंपद्धि [illegible] धर्मं श्रीहरिं श्रावयेद्व्रती ॥ कापसंपिष्टकं सर्पिः शा
८ मो र्करान्तं मनोहरं ॥६५॥ प्रदेयं हरये भक्त्या स्यात्सनो नवद्रव्ये ॥ सुगंधिपुष्पमालानां लक्षं प्रशस्तमीप्सितं ॥६६॥
प्रदेयं हरये भक्त्या हरिभक्तिविवृद्धये ॥ नैवेद्यानि च देयानि स्वादूनि मधुराणि च ॥६७॥ श्रीहरिप्रीतिश्रा
ल्यर्थं देयं नानाफलानि च ॥ नानाविधानि पुष्पाणि तुलसीसंयुतानि च ॥६८॥ श्रीहरिप्रीतये भक्त्या व्रते देया
नि सुव्रते ॥ ब्राह्मणानां सहस्रं च प्रसन्नं भोजयेद्व्रती ॥६९॥ स्यात्मनः सस्यवृद्ध्यर्थं व्रते जन्मनि जन्मनि ॥ पुष्पांजलि
शतं देयं नित्यं परं च पूजने ॥७०॥ प्रणामकं शतं देवी वर्त्ययं भक्तिवृद्धये ॥ षण्मासं च हविष्यं च मासं पक्षफला
दिकं ॥७१॥ हविः पक्षं जलं पक्षं व्रते भक्ष्यं च सुव्रते ॥ रत्नप्रदीपदानं तथैव लिंददीपांश्च वा निशं ॥७२॥ रात्रौ कुर्या

ना०॥
१७॥

सनंदत्त्वा निसं नारायणव्रते ॥ स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणं ॥ ७३ ॥ संकल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च ॥ मैथुनं विविधं साज्यं व्रती क्रियानिवद्द्वये ॥ ७४ ॥ ज्ञानवद्भिर्जागरणे शुचिष्मद्भिर्द्विजभोजने ॥ लोभमोहकामक्रोधभयपरोकनिवारकं ॥ ७५ ॥ कलहं च परित्याज्यं व्रते बंधुविवद्वये ॥ संपूर्णे च व्रते देवि प्रतिष्ठा तदनंतरं ॥ ७६ ॥ त्रिशतं च षष्ट्यधिकं लडुकं वस्त्रसंयुतं ॥ शुभोऽयं सोपवीतं च सोपहारमनोहरं ॥ ७७ ॥ त्रिशतं षष्ट्यधिकं सहस्रं विप्रभोजनं ॥ नानापक्वान्नसंयुक्तं शर्कराघृतपायसं ॥ ७८ ॥ त्रिशतं च षष्ट्यधिकं सहस्रं स्वर्णमेव च ॥ देवव्रतसमाप्ते च दक्षिणा विधिबोधिता ॥ ७९ ॥ अंत्यां समाप्तिदिवसे कथयिष्यामि दक्षिणां ॥ एतद्व्रतफलं देवि [illegible] भक्तितस्सौ भवेन्नरः ॥ ८० ॥ हरितुल्यो भवेत्पुत्रो विख्यातो भुवनत्रये ॥ सौंदर्यं स्यामि सौभाग्यमैश्वर्यं विपुलं धनं ॥ ८१ ॥ सर्ववांछितसिद्धीनां बीजं जन्मनि जन्मनि ॥ इत्येवं कथितं देवि व्रतं कुरु महेश्वरि ॥ ८२ ॥ पुत्रस्ते भविता साध्वीत्युक्त्वा स विरराम ह ॥ व्रतं गणेशोऽश्रवणं दुर्गा ग्रहश्मानसा ॥ ८३ ॥ १६२ ॥ इति श्रीब्रह्मवै० म० नारायणनारदसंवादे गणप० व्रतविधानं नाम चतुर्थोऽध्यायः ॥ ४ ॥

नारायण उ० ॥ श्रुत्वा व्रतविधानं च दुर्गा सिद्धेश्मानसा ॥ पुनः प्रपेच्छ कांतं सा दिव्यां व्रतकथां शुभां ॥ १ ॥ पार्वत्यु० ॥ [illegible]कृतं तेनाथ विधानं फलमस्य च ॥ आदिकां सुकथां ब्रूहि कथं वेदप्रबोधितां ॥ २ ॥ अथ कथाप्रारंभः ॥ श्रीमहादेव उ० ॥ शतरूपा मनोः पत्नी पुत्रदुःखेन दुःखिता ॥ ब्रह्मणस्थानमागत्य सा ब्रह्माणमुवाच ह ॥ ३ ॥

॥७॥
रं०

शातरूपोवाच॥ अन्येन प्रकारेण वंध्या याऽप्रसुतो भवेत्॥ तन्मे ब्रूहि जगन्नाथः सर्वकारणकारण॥४॥
तज्जन्मस्य विफलं ऽस्य जन्मैश्वर्यं धनमेव च॥ किंचिन्न शोभते गेहे विना पुत्रेण पुत्रिणां॥५॥ तपो दानोद्भवं पुण्यं जन्मां-
तरसुखावहं॥ सुखदो मोक्षदः प्रीतिदाता पुत्रस्तु पुत्रिणां॥६॥ पुत्रि पुत्रमुखं दृष्ट्वा शातात्श्वमेधजं फलं॥ पुंनाम-
नरकत्राणकारणं लभते ध्रुवं॥७॥ पुत्रोपायं वद विधे वदंतां तपसंयुतां॥ तदा भर्तृन्नत्वे चेत्पत्नी सह यास्यामि कान-
नं॥८॥ रूपाणाराज्यं सौभाग्यं धनं पृथ्वी प्रजावहां॥ किमेते नाव पोस्तात द्विना पुत्रेण पुत्रिणोः॥९॥ अपुत्रि-
णां मुखं दृष्ट्वा विद्याभोत्सहते शिवं॥ कुरुष्व दृश्यवितुं ज्ञानं सम्भवा मे सपुत्रकः॥१०॥ अथवा गरलं भुक्त्वा प्रवेक्ष्या-
मि हुताशनं॥ अपुत्रं पुत्रमस्त्रिवं महाणस्त्रीविहं सकं॥११॥ इत्येवं प्रभुरुक्त्वा सासा साक्षाद्दसेण श्रा-
करौ दृहा॥ सर्वैश्वर्यादि बीजं च सर्वकांक्षाप्रदं शुभं॥१२॥ मा पश्च कुत्र पो दृप्यां व्रतमेतत्सु पुण्यकं॥
कर्त्तव्यं शुक्रकाले च हृद्यत्नाराध्यं च सर्वदं॥१३॥ सर्वतसंख्य कर्त्तव्य सर्वविघ्नविनाशनं॥ येहोत्तानि च र-
ध्यानि व्रते देयानि सुव्रते॥१४॥ व्रतं च काण्वशाखोक्तं सर्ववांछितसिद्धिदं॥ हल्यापुत्रं च भजपे विष्णु-
तुल्यपराक्रमं॥१५॥ श्रवणश्च वचः श्रुत्वा सा सा दृसा व्रतमुत्तमं॥ प्रियव्रतोत्तानपादौ लेभे सुत्रो मनोहरौ॥१६॥
व्रतस्यास्य देवहुती लेभे सिद्धेश्वरं सुतं॥ नारायणांशं कपिलं पुण्यकं पुण्यदं शुभं॥१७॥ अरुंधती दृहस्ता

१७

तुष्टे भेजा लिंगं शुभं शुभा ॥ राज्ञि क्रांता व्रतं कृत्वा लेभे पुत्रं परात्परं ॥१८॥ अदितिश्च व्रतं कृत्वा लेभे वा
मनं कंशुभं ॥ शची जयंतं पुत्रं च लेभे कृत्वेदमीश्वरी ॥१९॥ उत्तानपादपत्नी द्र कृत्वा लेभे ध्रुवं सुतं ॥
कुबेरजाया कृत्वेदं लेभे च नलकूबरं ॥२०॥ सूर्यपत्नी मनुं लेभे कृत्वेदं व्रतमुत्तमं ॥ [illegible]हस्पतिं सुरगुरु
पुत्रमस्य प्रभावतः ॥२१॥ भृगोर्भार्या व्रतं कृत्वा लेभे दैत्यगुरुं सुतं ॥ शुक्रं नारायणांशं च सर्वतेज
स्विनां परं ॥२२॥ इत्येवं कथितं देवि व्रतानामुत्तमं व्रतं ॥ संयमं कुरु कल्याणि हिमालयसुते शुभे ॥२३॥
साध्यं राजेंद्रपत्नीनां देवीनां च सुखावहं ॥ व्रतमेतन्महासाध्वी साध्वीनां प्राणतः प्रियं ॥२४॥ व्रतस्या
स्य प्रभावेन स्वयं गोपांगनेश्वरः ॥ ईश्वरः सर्वदेवानां तव पुत्रो भविष्यति ॥२५॥ इत्युक्त्वा तां कुमार
स्तत्र विरराम च नारद ॥ व्रतं च कारसा देवी प्रहृष्टा सा कृताज्ञया ॥२६॥ इत्येवं कथितं देवी किं भूयः
श्रोतुमिच्छसि ॥ सुखदं मोक्षदं सारं गणेशजन्मकारणं ॥२७॥२८॥ इति श्री ब्र० म० पु० नारायणना
रदसंवादे गणपतिखंडे व्रतकथाप्रकथनं नाम पंचमोऽध्यायः ॥५॥ शौनक उ० ॥ नारायणवचः श्रुत्वा ना
रदो हृष्टमानसः ॥ व्रतस्य सविधानं च संप्रष्टुमुपचक्रमे ॥१॥ नारद उ० ॥ हृतं केन प्रकारेण व्रत

वेतघुभावहंगतन्मोक्ष हिपुनिश्रेष्ठ पार्वत्याभर्तुराततया ॥२॥ लब्ध्वा भजन्मयोगीन्द्राः इत्येते शुभमतयाश्रते ॥
श्रेमन्केन प्रकारेण तभ्भः शंसितुमर्हसि ॥३॥ नारायण उ० ॥ कश्यपथिसा कथां दिव्यां विधानंच व्रतस्यच ॥
स्वयं विधाता तपसां जगाम तपसे शिवः ॥४॥ हरेराराधने व्यग्रो कर्त्तिपेद्ध्यरो हरः ॥ हरिभावनश्री
लश्च हरिस्मृतिपरायणः ॥५॥ परमानंदपूर्णश्च ज्ञानानंदसनातनः ॥ दिवानिशं जनो याति हरिमंत
र्धिहिस्मरन् ॥६॥ प्रहृष्टमानसा देवी पार्वती भर्तुराततया ॥ किंकरान्प्रेरयामास विप्रांश्च अतहेतवे ॥७॥
आनीय सर्वदिव्यानि व्रतोपयोगिकानि च ॥ व्रतं भर्तुः समारेभे सुभद्रा सा शुभक्षणे ॥८॥ सनत्कुमारोऽप
गवाञ्जगाम विधेः सुतः ॥ कर्त्तिमान्तेजसां राशिः प्रज्वलन्निव तेजसा ॥९॥ प्रसाजगाम हर्षश्च प्रसन्नो कौ
सभार्यकः ॥ विष्णुः क्षीरोदशायी च सहलक्ष्मीकश्चतुर्भुजः ॥१०॥ भगवान्जगतां पाता शास्ता भर्त्ता सि पार्ष
दः ॥ वनमालाधरः शाको भक्तिवतो रत्नभूषणः ॥११॥ महासंभृतसंभारो रत्ननामेन नारद ॥ पत्नीश्च सुमति
श्चैव सवित्रीभ्यश्च सहानुगः ॥१२॥ पुलहश्च पुलस्तिश्च वसिष्ठो भृगुरंगिराः ॥ अगस्तिश्च प्रचेताश्च दुर्वासाश्च व
नस्तथा ॥१३॥ जाबालो जमदग्निश्च जैगीषव्यश्च देवलः ॥ गोतमो मुरवश्चकरथः पालिभद्रः पराशरः ॥१४॥
विश्वामित्रो वामदेवो ऋष्यशृंगो विभांडकः ॥ मार्कंडेयो मृकंडुश्च वरस्कुवो लोमशस्तथा ॥१५॥ कौत्सो वत्सश्च
दक्षश्च कात्यायनिरघमर्षणः ॥ कात्यायनः कणादश्च प्राचिनिः कुकुरायनः ॥१६॥ शांकुरायविशीणीश्चैव

पा०
॥१९॥

६+ रत्नानां स्वर्णानां च तथैव च ॥ मुक्तानां च पत्रु
लैः हीरैः श्रीसुभानां सहस्रकं ॥३३॥ सुस्वादुमिष्ट +६

श्चापखड्गः शंखचक्र पद्म ॥ हस्तेनान्येन च वहयो सन्निधापमुनयो मुने ॥१७॥ आशंसंच धर्मपुत्रोऽथ नरनारायणो
मुने ॥ दिक्पाला अष्टथा देवाय क्षगंधर्वकिन्नराः ॥१८॥ आजग्मुः पर्वताः सर्वे सिगणाः पार्वतीव्रते ॥ हिमा
लयः श्रीशैलराजः सापत्यश्च सभार्यकः ॥१९॥ सगणः सानुगः श्चैव रत्नभूषणभूषितः ॥ महासंस्कृत
संभारो नानाद्रव्यसमन्वितः ॥२०॥ मालामाणिक्यरत्नानि व्रतोपयोगीकानि च ॥ नानाप्रकार वस्त्राणि ज
गलांदुर्लभानि च ॥२१॥ लक्षं च गजरत्नानामश्वरत्नं त्रिलक्षकं ॥ द्विलक्षं गवां रत्नं लक्षं सुवर्णकं ॥२२॥
रत्नपूर्णानां हीरैर्व्याप्तानां लक्षभाराणि कौतुकात् ॥ अनंतरत्नप्रभवं आजगाम सुताव्रते ॥२४॥ ब्राह्मणा मा
नवाः सिद्धाः नानाविद्याधरास्तथा ॥ भिक्षुको भिक्षुकाश्चैव वंदिनः पार्वतीव्रते ॥२५॥ विद्याधर्यपर्णीश्चैनं
च अंभ कौसरसां गणाः ॥ नानाविधा वाद्यभांडआजग्मुः शिवमंदिरं ॥२६॥ कैलासराज्यमागच्छेयं दने
नमुसंस्कृतं ॥ आम्रपल्लवसत्रौचंकं कदलीस्तंभशोभितं ॥२७॥ दूर्वाधान्य पर्णलताफलपुष्पविराजितं ॥
निर्मितं परमरागेण देवेशस्य गणा मुदा ॥२८॥ ऋत्विजः सिंहासने देवे ते पूजिताः शंकरेण च ॥ कैलासवासिनः
सर्वे परमानंदसंयुताः ॥२९॥ हानाध्यक्षः सुनासीरः कुबेरः कोशरक्षकः ॥ अन्ये शाचस्य यं सर्वैः पति
वेशो जलाधिपः ॥२०॥ दध्यानं च सहस्राणि दुग्धानां च तथैव च ॥ सहस्राणि घृतानां च गुडानां च शर्करा
णां निचय ॥३१॥ माध्वीकानां सहस्राणि तिलानां चम्रातानि च ॥ लक्षं कंचेयत ब्राह्मणानां बभक्षुः पार्वतीव्रते ॥३२॥

॥३४॥

पिष्टकाणांच कुंजानि भूतलक्षाणि नारद ॥ स्वस्तिकानांचापकानां बभूवुर्लक्षराशयः ॥ ३३ ॥ गुडसंस्कृत
ण्णानांच बभूवुः कोटिराशयः ॥ शालीनां पृथुकानांच मतिनांच महामुने ॥ ३४ ॥ बभूवुः पर्वतास्तत्र
कैलासे पार्वतीव्रते ॥ पायसं पिष्टकंचैव स्वान्नं सुमनोहरं ॥ ३५ ॥ चक्राकलक्ष्मीः पाकंच व्यंजनं घृतसंस्कृ
तं ॥ बभुजे देवर्षिगणैः सार्द्धं नारायणं स्वयं ॥ ३६ ॥ बभूवुर्लक्षविप्रौपरिवेषणकारकाः ॥ तांबूलंच ददौ श्रव ४
ते भूपः कर्पूरादिसुवासितं ॥ ३७ ॥ रत्नसिंहासनास्तेच विप्रमुख्याः सुदक्षिणाः ॥ रत्नसिंहासनस्थंच वि
ष्णुं क्षीरोदवासिनं ॥ ३८ ॥ सेव्यमानः पार्षदैश्च समीतैः श्वेतचामरैः ॥ ऋषिभिः स्तूयमानंच सिद्धैर्देवग
णैस्तथा ॥ ३९ ॥ विद्याधरीणां नृत्यानि पश्यंतं सस्मितं मुदा ॥ गंधर्वाणांच संगीतं श्रुतवंतं मनोहरं ॥ ४० ॥
पप्रच्छांकरो प्रसन्नं प्रसन्नवक्त्रं भक्तिपूर्वकं ॥ ब्राह्मणप्रेरितो युक्तं व्रतं कर्त्तुमभीप्सितं ॥ ४१ ॥ देवर्षिगणकर्णा
पां सभायां संपुटांजलिः ॥ श्रीमहादेव उ० ॥ मदीयं प्रार्थनं नाथ श्रीनिवास शृणु प्रभो ॥ ४२ ॥ तपःस्वरूपं तपसां
कर्मणांच फलप्रदः ॥ व्रतानां जपयज्ञानां फलानां सर्वपूजितः ॥ ४३ ॥ सर्वेषां बीजरूपेण वांछाकल्पतरोह
रे ॥ सुपुण्यकव्रतं कर्तुं अत्रमिच्छति पार्वती ॥ ४४ ॥ पुत्रार्थिनी सा शोकार्त्ता हृदयेन विदूयती ॥ रतिभंगे रते दे
४५ वैर्वर्जं च पं भिन्नादिता ॥ प्रबोधिता मया साध्वी विविधैर्वचनामृतैः ॥ सुतं स्वामिसौभाग्यं सुव्रता
पाच्यते व्रते ॥ ४६ ॥ ताभ्यां विना न संतुष्टास्य प्राणांस्त्यक्तुमिच्छति ॥ पुरा त्यक्तं स्वदेहंच पितृयज्ञेच मानि

रा०
॥१०॥

नी ॥४७॥ मन्त्रिंदुर्थं त्रैलोक्ये हे पुत्र जन्मजन्मसा ॥ सर्वं जानासि वृत्तांतं सर्वज्ञं सांव हामिद्धिं ॥४८॥ कान्ता
तां वद तत्सत्त्वं परिणामसुभप्रदं ॥ दुर्निवार्यश्च सर्वेषां स्त्रीप्रभावश्च चापलः ॥४९॥ दुस्त्याज्यो योगिभिः
सिद्धैरस्माभिश्च तपस्विभिः ॥ जितेंद्रियैर्जितक्रोधैः स्त्रीरूपं मोहकारणं ॥५०॥ सर्वमायाकरं रूपं च काम
वर्द्धनकारणं ॥ अस्मात्स्त्रीकामदेवस्य दुर्जयं जयकारणं ॥५१॥ मुनिर्मितं च विधिना सर्वेषां विधिपूर्व
कं ॥ मोक्षद्वारकपाटं च हरिभक्तिविरोधनं ॥५२॥ संसारबंधनं साक्षात् रज्जुरूपं सनातनं ॥ वैराग्यरोधनो
बीजं च यच्छ्रावकरागविवर्द्धनं ॥५३॥ पतनं साहसानां च दोषाणामालयं सदा ॥ अप्रत्ययानां क्षेत्रं च स्वयं प्र
कटमत्तिमिलम् ॥५४॥ अहंकाराश्रयं शश्वद्विषकुंभं सुधामुखं ॥ सर्वैरसाध्यं साध्यं च दुराराध्यं च सर्वदा ॥
॥५५॥ स्वकार्यसाध्यं चाबोध्यं कुलहा कुरकारणं ॥ सर्वं निवेदितं नाथ मत्तं त्वं कर्त्तुमर्हसि ॥५६॥ कार्यं स
वपरामर्शं परिणामसुखावहं ॥ नारायण उ० ॥ इत्येवमुक्त्वा भगवान्गिरीशः पद्मसनो मुखं ॥५७॥ चिररा
म सभामध्ये सस्मितास्यश्च कमलापतिं ॥ शंकरस्य वचः श्रुत्वा सोऽप्रहस्य जगदीश्वरः ॥५८॥ हितं मितं च वच
नं प्रवक्तुमुपचक्रमे ॥ श्रीविष्णुरु० ॥ पुण्यकं व्रतसारं च सती संतानहेतवे ॥५९॥ स्वामिसौभाग्यवी
जं च पत्नीते कर्तुमिच्छति ॥ सर्वसाध्यं दुराराध्यं सर्वकामफलप्रदं ॥६०॥ शुभदं सुखसारं च मोक्ष
दं पार्वतीश्वर ॥ सर्वेश्वरो व्रताराध्यो गोपीशः श्रीगुणाकरः ॥६१॥ गोलोकनाथो भगवान्स्वर्णश्र

॥१०
रवे

स सनातनः ॥ निराश्रयैर्निर्लिंगो निरूपाधिर्निरामयः ॥ ६२ ॥ भक्तप्राणश्च भक्तेशो भक्तानुग्रहकारितः ॥ दु
श्च राराध्यो हि योन्येषां भक्तानां मतिदायकः ॥ ६३ ॥ भक्ताधीनो हि भगवान्सर्वसिद्धो हि निष्फलः ॥ येपस्यच क
लौः कृष्णोश्च स्वयं विष्णु महेश्वरः ॥ ६४ ॥ महान्विराट्तदंशाश्च निर्लिप्तः प्रकृतेः परः ॥ अव्ययो विग्रह
श्चोग्रो भक्तानुग्रहकारकः ॥ ६५ ॥ त्रिकोटिजन्मसाध्यं च न साध्यं भारतं विना ॥ तस्माद्धि भारते जन्म ह
रिभक्तिं लभेन्नरः ॥ ६६ ॥ सवनं क्षुद्रदेवानां दत्त्वा स सप्तसु जन्मसु ॥ सूर्यमंत्रमवाप्नोति केवलं सततद्वि
षाः ॥ ६७ ॥ सूर्यमंत्रसमाराध्य त्रिषु जन्मसु भारते ॥ प्राप्नोति शैवमंत्रं च सर्वदं मानवो ध्रुवं ॥ ६८ ॥ सं
सेव्य परया भक्त्या सामेव सप्तजन्मसु ॥ प्राप्नोति मायामंत्रं च तस्याः पादप्रसादतः ॥ ६९ ॥ शतं जन्मसमा
राध्य मायां नारायणीं परां ॥ नारायणकलां सर्वां समवाप्नोति मानवः ॥ ७० ॥ कृष्णभक्तिमवाप्नोति भ
क्तसंसर्गहेतुकं ॥ संप्राप्य भक्तिं विष्णुं मां भजमानस्य भासते ॥ ७१ ॥ प्राप्नोति परिपक्वं च मतिं भक्तनिषे
वया ॥ सद्भक्तिप्रसादेन देवानामाशिषा शिव ॥ ७२ ॥ श्रीकृष्णमंत्रं प्राप्नोति निर्वाणफलदं परं ॥ कृ
ष्णश्रितं कृष्णमंत्रं सर्वकामफलप्रदं ॥ ७३ ॥ कृष्णतुल्यो भवेद्भक्तो चिरं कृष्णनिषेवया ॥ महतिः प्रलयः
पातः सर्वेषां सर्वनिश्चितो ॥ ७४ ॥ न पातः कृष्णभक्तानां साधकानामविनाशिनां ॥ अविनाशिनि गोलो
के मोदते कृष्णकिंकराः ॥ ७५ ॥ हसंति ते सुनिश्चिंतादेवान्नस्यादिकं शिव ॥ त्वं संहर्त्तापि सर्वेषां न भक्ता

ग०
११३॥

नां महेश्वर ॥७६॥ माया मोहयते सर्वान्भक्तानां च मम हि मम ॥ माया नारायणी माता सर्वेषां दुःखभक्ति
दा ॥७७॥ न दुःखभक्तिं प्राप्नोति विना मायानिषेवणं ॥ सा च नारायणी माया मूलप्रकृतिरीश्वरी ॥७८॥
दुःखप्रिया दुःखभक्ता दुःखतुल्या विनाशिनी ॥ सा च तेजःस्वरूपा च स्वेच्छाविग्रहधारिणी ॥७९॥ आ
विर्भूता च देवानां तेजसा सुमेरुगह्वरे ॥ निहत्य दैत्यान्सर्वांश्च दक्षपत्नी च भारते ॥८०॥ लब्धा पत्युः
तपसा जन्म चाप्नेश जन्मनः ॥ सत्यक्त्वा देहं पितृयज्ञे सा सती तव निंदया ॥८१॥ जगाम देवी गोलोकं दुर्
गं ॥ जिं सनातनी ॥ गृहीत्वा विग्रहं तस्याः गुणरूपाश्रयं परं ॥८२॥ ध्यामं ध्यामं भावतेस्यं विषण्णो भूः
पुरास्मरः ॥ विबोधिता मया सं च श्रीकृष्णे सुसंहितं ॥८३॥ लब्ध्वा भवंतं सा कृष्णकृतां तपसा चिरेण
च ॥ कृष्णतुल्यं कं साध्वी सुव्रता सुव्रतं शिव ॥८४॥ राजसूयसहस्राणां पुत्रे पत्रधनव्ययः ॥ नसाध्वं
सर्वसाध्वीनां व्रतमेतत्रिलोचन ॥८५॥ स्वयं गोलोकनाथश्च कृष्णश्च स्वप्रभावतः ॥ पार्वत्यागर्भजातस्तत्र
तव पुत्रो भविष्यति ॥८६॥ स्वयं देवगजानां च यस्मादीशः कृपानिधिः ॥ गणेश इति विख्यातो भविष्यति
जगत्त्रये ॥८७॥ यस्य स्मरणमात्रेण विघ्नं निर्विघ्नतां भवेत् ॥ जगतां हि रंबतातेन विघ्नं विघ्नाभिधो विभो ॥८८॥
नानाविधानि द्रव्याणि यस्मा देयानि पुण्यके ॥ पुंसालं बोदरं चं चलेन लंबोदरः स्मृतः ॥८९॥ शनैर्दृष्ट्या
शिरश्छेदो गजवक्त्रेण योजितः ॥ गजाननं शुभं तेन निबेधः केन वार्यते ॥९०॥ परशुर्नाम्पशुरामस्य यदेकं

॥११३॥
रंव

दंतखंडकं ॥ प्रविष्यंति निकेषेनैव कृदंताभिध्यः श्रीशुः ॥ ९१ ॥ पूज्यश्च सर्वदेवानामस्माकं जगतां विभुः ॥ स
वनित्यपूजनेनस्य भविता महदरेणवै ॥ ९२ ॥ पूजासु सर्वदेवानामग्रसंपूज्यतां जनः ॥ पूजाफलमवाप्नोति निर्वि
घ्नेन व्यथान्यथा ॥ ९३ ॥ गणेशंच दिनेशंच विष्णुं शंभुं हुताशनं ॥ दुर्गामनेन संसेव्या पूजयेद्देवतावरं ॥ ९४ ॥
ज
गणेशपूजने विघ्ननिघ्नं त्रिंगतिर्भवेत् ॥ निर्व्याधिः सूर्यपूजायां शुचिः श्रीविष्णुसेवने ॥ ९५ ॥ मोक्षश्च पा
पनाशश्च यशः शौर्यविवर्द्धनं ॥ तत्वज्ञानं सुतस्तानां बीजं शंकरपूजनं ॥ ९६ ॥ सुबुद्धिः सुस्त्री सद्भूमिः सत्प्रजाबं
धुकारणं ॥ हरिभक्तिप्रदश्चैव परं दुर्गार्चनं शिवे ॥ ९७ ॥ निधने संस्मृतागिंच ज्ञानमक्षयं लभेन्नरः ॥ शताभीका
च भवति शंकराञ्चनिषेवणात् ॥ ९८ ॥ विपरीतं शिवं गतामेते वा पूजनं विना ॥ एवं क्रमो महादेव कथ्येक
लो विनिश्चितं ॥ ९९ ॥ एषे [illegible] श्वरी विश्वमाता नित्यासृष्टिपरायणा ॥ आविर्भविष्यति सा भावी एतेषामीश्व
ररूपया ॥ १०० ॥ इत्युक्त्वा श्रीहरिस्तत्र विरराम सभांतरे ॥ प्रहृष्टा देवता विप्राः पार्वत्या सहसंभ्रमः ॥ १०१ ॥
॥ २ [illegible] ॥ इति श्रीब्रह्मवैवर्ते महापु° नारायणनारदसंवादे गणपतिखंडे पुण्यकव्रताज्ञोपदेशो नाम षष्ठोऽध्या
यः ॥ ६ ॥ नारायण उ° ॥ हरेराज्ञां समादाय शिवाय प्रहृष्टमानसा ॥ उवाच पार्वती प्रीत्या हरिसंतोषमंगलं ॥ १ ॥
शिवाज्ञां च समादाय शिवाप्रहृष्टमानसा ॥ वाद्यं च वादयामास मंगलं मंगलप्रदं ॥ २ ॥ सुस्नाता सुदती
शुक्ले बिभ्रती धौतवाससी ॥ संस्थाप्य रत्नकलशं शुक्लधान्योपरिस्थितं ॥ ३ ॥ संस्थाप्य पुरतो [illegible]

दिक्पालान्वस्त्रभूषितान् ॥ देवांतराश्च नागाश्च समर्च्य विधिनोदितं ॥४॥ समर्च्य परया भक्त्या प्रसन्नपिंडु
महेश्वरान् ॥ चंदनागरुकस्तूरीकुंकुमेन विराजितान् ॥५॥ वन्हिशुद्धांशुवस्त्रेण सद्रत्नभूषणेन च ॥ रजोन्यद्र
पु३ व्यविविधैः पूजिताश्च सुपुष्पकैः ॥६॥ समारंभे व्रतं देवी स्वस्तिवाचनपूर्वकं ॥ आचार्याभीष्टदेवं तं श्रीहरं
मंगलेव्रते ॥ भक्त्या द्विजोत्तमेणैव सोपचाराणि षोडश ॥ यानि व्रतविधेयानि देयानि विविधानि च ॥८॥ प्र
ददौ तानि सर्वाणि प्रसन्नं फलदानि च ॥ अतोऽनंतमुपहारैश्च दुर्लभं भुवनत्रये ॥९॥ तत्र सर्वं ददौ भक्त्या सुव्र
ते सुव्रता सती ॥ दत्वा सर्वाणि द्रव्याणि वेदमंत्रेण सा सती ॥१०॥ हापंचकारयामास सप्रीतं सतिलसर्पिषा ॥
ब्राह्मणान्भोजयामास देवतातिथिपूजितान् ॥११॥ कर्तव्यमेव कर्तव्ये सुव्रते सुव्रता सती ॥ प्रसहं साव
धानेष्यं चकार पूर्णवत्सरं ॥१२॥ समाप्तीदिवसे विप्रता प्रोवाच पुरोहितः ॥ सुव्रते सुव्रते मह्यं देहीति पति
दक्षिणां ॥१३॥ श्रुत्वा पुरोहितोक्तं सा विलप्य सुरसंसदि ॥ मूर्छां प्राप्य महामायामोहिता सा च चेतसा ॥१४॥
सतीं च मूर्छितां दृष्ट्वा प्रहस्य मुनिपुंगवाः ॥ संबुद्धं प्रेषयामास सुव्रतां विष्णुश्च नारद ॥१५॥ संप्रेषितः शिवः
स्वैश्च शिवां बोधयितुं शिव ॥ शिवः समुपमंचक्रे प्रवक्तुं वदतां मुने ॥१६॥ श्रीमहादे० ॥ उत्तिष्ठ भद्रे भद्रं ते
भविष्यति न संशयः ॥ सांप्रतं चेतनं त्यक्त्वा मदीयं वचनं शृणु ॥१७॥ शिवः शिवां तामित्युक्त्वा शुश्रूषं तो
घृतानुग्रः ॥ वससि स्थापयामास कारयामास चेतनां ॥१८॥ हितं सत्यं मितं सर्वं परिणामसुखावहं ॥

यज्ञास्यैरं च फलं दृष्टं वक्तुमुपचक्रमे ॥१९॥ शृणु देवी प्रवक्ष्यामि पद्वेदेन निरूपितं ॥ सर्वसंमतमित्यस्य ध-
र्माय धर्मसंसदि ॥२०॥ सर्वेषां कर्मणां देवी सारभूता च दक्षिणा ॥ यज्ञो दानफलदानित्यं धार्यश्चैव धर्मक-
र्मणि ॥२१॥ दैवं वापेत्लवं वापि नित्यं नैमित्तिकं प्रिये ॥ यत्कर्म दक्षिणाहीनं तत्सर्वं निष्फलं भवेत् ॥२२॥
दाता च कर्मणां तेन काले सत्यं च नजेद्ध्रुवं ॥ देहांते देव्यमाप्नोति स्वासातिः परिपीडितः ॥२३॥ दक्षिणा
५ तु विप्रमुद्दिश्य तत्कालं न दीयते ॥ तन्मुहूर्ते व्यतीते तु दक्षिणा द्विगुणा भवेत् ॥२४॥ चतुर्गुणा दि-
ने तीते पक्षे शतगुणा भवेत् ॥ मासे पंचशतगुणा षण्मासे तु चतुर्गुणा ॥२५॥ संवत्सरे व्यतीते तु
तत्कर्म निष्फलं भवेत् ॥ दाता च नरकं याति यावच्चंद्रदिवाकरौ ॥२६॥ पुत्रपौत्रधनैश्वर्यं क्षयमाप्नो-
ति पातकात् ॥ धर्मानिष्ठो भवेत्तस्य धर्महीने स्वकर्मणि ॥२७॥ श्रीविष्णुः ॥ रक्षस्य कर्मधर्मिष्ठे ध-
र्मिष्ठे धर्मकर्मणि ॥ सर्वेषां च भवे दाता स्वधर्मपरिपालके ॥२८॥ श्रीलक्ष्मीः ॥ पश्च्य केन निमित्तेन न धु-
र्मपरिरक्षति ॥ धर्मेन ऽचधर्मज्ञे तेस्य सर्वं विनस्यति ॥२९॥ धर्मउ० ॥ मां रक्षपत्नेतः साध्वी कुरु प्रणं
प्रतं सती ॥ मयि स्थिते महासाध्वी सर्वभद्रं भविष्यति ॥३०॥ देवा ऊचुः ॥ धर्मं रक्ष महासाध्वी कुरु प्रणंप्र-
तं सती ॥ वयं तेन [illegible] कुरुष्व सा प्रणमामनंस ॥३१॥ पुनरूचुः ॥ सत्वा साध्वी प्रणीतं मे देहि विप्राय दक्षि-
णां ॥ स्थिते च स्मात्सु भवेत्तोः किमभद्रं भविष्यति ॥ सूत ॥ सनत्कुमारः ॥ शिवं शिवे देहि मह्यं नन्वेद्व्रतफलं प्रते

ग॰
॥३२॥

सुचिरं संचितः स्यापि स्वात्मन स्तपसः फलं ॥३३॥ पार्वत्युवाच ॥ किं कर्मणा पदे देवेशः किमद्दक्षिणया सुते ॥
किं पुत्रेणाथ धर्मेण यत्र भर्त्तापि दक्षिणा ॥३४॥ यदि भर्त्ता मिमयात्स्यात्का यदि भक्षश्च दैवतं ॥ गते च का-
रणे श्राद्धं कृतः स स्यकृतः फलं ॥३५॥ प्राणांतस्य का स्यैव पापं दैदैन किं प्रयोजनं ॥ दक्षिणः दक्षिणवि-
हीनेव च हेतु वा किं प्रयोजनं ॥३६॥ मृते तु पुत्रस्य मातेः साध्वी याज्ञस्तु रक्ष्यतः ॥ यदि भर्त्ता भवेद्देवः किं ते४
धनेन सुतेन वा ॥३७॥ भर्त्तु रक्षाश्च यत्नतः केवलं भर्त्तु फलकः ॥ यत्र फलं भवेद्दृष्टं तद्धानि त्वं च नि-
फलं ॥३८॥ शिव उवाच ॥ पुत्रादपि परः स्वामी धर्मश्च स्वामिनः परः ॥ न स्त्रीधर्मश्च धर्मिष्ठे स्वामिना
किं सुते नवं ॥३९॥ श्रीसौवा॰ ॥ स्वामिनश्च परो धर्मो धर्मी त्वं स च सुव्रते ॥ तस्य संकल्पितं कर्म न तु
त्वं कुरु व्रते ॥४०॥ पार्वत्युवाच ॥ निरूपिते सुदेवेषु स्वत्राद्धो धर्मे वा च यक्रः ॥ न य स्योस्त्रीति स स्वामीव दु-
क्तः शृणु मद्वचः ॥४१॥ तस्य दाता स दास्वामी न च स्वस्वामिनो भवेत् ॥ अहो व्यय स्वाभवति वेदज्ञा
नं न बोध्यतां ॥४२॥ धर्म उ॰ ॥ पत्नीं विना न चान्यस्य स्वामिनं दातुमर्हसि ॥ दंपती धर्मवित्कांतो ह्येको दे-
ता च द्वौ समौ ॥४३॥ पार्वत्यु॰ ॥ पिता ददाति यां पात्रे स च नत्यजति लक्ष्मुतां ॥ न श्रुतं विपरीतं च श्रुतौ श्रुतिप
रापणौ ॥४४॥ देवा ऊचुः ॥ बुद्धिस्वरूपासं दुर्मे बुद्धिमंतो च पंसया ॥ वेदज्ञे वेदवादेषु केया तां जेतुमीश्वराः ॥४५॥
निरूपिता पुण्यकेऽन्नव्रते स्वामी च दक्षिणा ॥ श्रुतौ श्रुतोयः स धर्मो विपरीतो स्वकर्मकृः ॥४६॥ पार्वत्यु॰ ॥

॥३२॥
स्वं॰

केवलं देहमाश्रित्य कः करोति विनिर्णयं ॥ वक्तवांल्लौकिकः कोपि दृष्टो कार्यांश्च तस्य जेत् ॥४७॥ वेदप्र-
कृति पुंसोश्च गरीयान्सुरूपोद्भवं ॥ निबोधितासुराः प्राज्ञा बाला ह्यहं कथयामि किं ॥४८॥ बृहस्पतिः ॥ न
पुमांसं विनास्य हिंसा [illegible]धीश्च प्रकृतिं विना ॥ श्रीकृष्णश्च स्वयं सोऽस्य शासमो प्रकृतिमरूपो ॥४९॥ पार्वत्युः ॥
वः कृष्णप्रकृतेः स्वगुणा सांव्रतेन सगुणः पुमान् ॥ पुमान्नारीं प्रकृतेन थापिनतत श्च सा ॥५०॥ एतस्मिन्नंतरे
देवामुनयः सर्वे संसदि ॥ रत्नेंद्रसारनिर्माणमाश्चर्यं ददृशू रथं ॥५१॥ पार्षदैश्च परिवृतं सर्वैः श्यामैश्चतुर्भु-
६ ले जैः ॥ वनमालापरिवृतै रत्नभूषणभूषितैः ॥५२॥ अवरुह्य ततो यानं स्वाजगाम सभांके तं तुष्टुवुः संतसुरेंद्रा-
स्ते देवं वैकुंठवासिनं ॥५३॥ शंखचक्रगदापद्मधरं श्रीशं चतुर्भुजं ॥ लक्ष्मीसरस्वतीकांतं शांतं तं सुमनोहरं ॥५४॥
सुखदृश्यं भक्तानामदृश्यं कोटिजन्मभिः ॥ कोटीकंदर्पलावण्यं कोटिचंद्रसमप्रभं ॥५५॥ अमूल्यरत्न-
रचितं चारुभूषणभूषितं ॥ सेव्यं प्रसादिदेवैश्च सेवकैः संस्तुतं शुभं ॥५६॥ तद्भासया च प्रच्छन्नैर्वेष्टितं च सु-
रर्षिभिः ॥ वासयामास तं ते च रत्नसिंहासने वरे ॥५७॥ तं ते प्रणेमुः शिरसा प्रसन्नं विष्णुं शिवादयः ॥ संपुटां-
जलयः सर्वे पुलकांगाश्रुलोचनाः ॥५८॥ सस्मितस्तान्समप्रच्छ सर्वं मधुरया गिरा ॥ प्रबोधितुं सुबोधज्ञः
प्रवक्तुमुपचक्रमे ॥५९॥ नारायण उ० ॥ सहं बुध्वा बुद्धिमंतो न वक्तुमुचितं सुराः ॥ सर्वेशान्यान्नपा विश्वेशक्ति-
मंतो हि जीविनः ॥६०॥ प्रसादितृणपर्यंतं सर्वं प्रकृतिकं जगत् ॥ सत्संविसं विनामां च मायाशक्तिः प्रकाशिता ॥६१॥

॥ ग० ॥
॥ १५४ ॥

आविर्भूता च सा मंतो सृष्टौ देवी मदीच्छया ॥ तिरोहिता च सा शेषे सृष्टिसंहरणे मयि ॥ ६२ ॥ सृष्टिकर्त्री च
प्रकृतिः सर्वेषां जननी परा ॥ ममतुल्या च मन्माया तेन नारायणी स्मृता ॥ ६३ ॥ सुचिरं तपसा लब्धं शंभुं ।
नाध्याय ता च मां ॥ तेन तस्मै मया दत्ता तपसां फलरूपिणी ॥ ६४ ॥ अतं च लोकसिध्यर्थं मस्मान्नस्यापि मे वचः ॥
स्वरूपं श्रुतानां तपसां फलदात्री जगत्त्रये ॥ ६५ ॥ पापघ्ना मोहिताः सर्वे किमस्या या स्तवं प्रतं ॥ साध्यमस्या प्रतफ-
लं कल्पे कल्पे पुनः पुनः ॥ ६६ ॥ सुरेश्वरा मदंशाश्च ब्रह्मविष्णुशिवादयः ॥ कलाः कलांशरूपास्ता जीविनश्च सु-
रादयः ॥ ६७ ॥ मृदा विना घटं कर्तुं कुलालश्चेव यथाक्षमः ॥ विना शक्त्या तथाहं च स्वसृष्टिं कर्तुमक्षमः ॥ ६८ ॥ शक्तिः
प्रधाना सृष्टेश्च सर्वदर्शनसंमतं ॥ अहमात्मा हि निर्लिप्तोदृश्यः साक्षी च देहिनां ॥ ६९ ॥ देहाः प्रकृतिकाः सर्वे न-
श्वराः सौतिपंचकाः ॥ अहं नित्यः शरीरी च नानुविग्रहविग्रहाः ॥ ७० ॥ सर्वाधारा च प्रकृतिः सर्वात्माहं जग-
तश्च ॥ अमी ते समनो ब्रह्मा ज्ञानरूपो महेश्वरः ॥ ७१ ॥ पंच प्राणाः स्वयं विष्णुर्बुद्धिः प्रकृतिरीश्वरी ॥ शक्तादि-
द्रादयश्चैताः सर्वाश्च प्रकृतेः कलाः ॥ ७२ ॥ साच शैलेंद्रकन्येयं प्रकृतिर्वेदनिरूपितं ॥ अहं गोलोकनाथश्च वैकुंठेशः
सनातनः ॥ ७३ ॥ गोपीगोपैः परिवृत तत्रेव च द्विजः स्वयं ॥ चतुर्भुजोत्र देवेशो लक्ष्मीशः पार्षदैर्वृतः ॥ ७४ ॥ ऊर्ध्वं
परश्च वैकुंठात् संस्थाता कोटियोजने ॥ मम श्रमश्च गोलोके यत्राहं गोपिकापतिः ॥ ७५ ॥ अताराध्यो हि द्विभुजः
स च तत्फलदायकः ॥ यद्रूपं चिंतयेद्यो हि तच्चत फलदायकं ॥ ७६ ॥ अतं परं कुरु शिवे शिवं दत्वा च दक्षिणां ॥ पु-
नः समुच्चितं काल्पे दत्वा नाथं गृहिष्यसि ॥ ७७ ॥ विष्णुदेहो यथा गावो विष्णुदेहस्तथा शिवः ॥ द्विजाय दत्वा गो ॥ १५४ ॥
रंच०

माल्यं गृहाण स्वामिनः शुभे ॥७८॥ पत्नेपत्नीव यथा दातुं क्षमः स्वामी स देवहि ॥ तथा सा स्वामिनं दातुमीश्वरी
तिश्रुतौ यसं ॥७९॥ इत्युक्त्वा स सभामध्ये तत्रैवालरधीपतं ॥ दद्धाले: साच संहृष्टा दक्षिणां दातुमुद्यत ॥८०॥
तस्या शिवा पूर्णहोमं सा शिवं दक्षिणां ददौ ॥ स्वस्ति स्वस्त्युक्त्वा च जग्राह कुमारो देवसंसदि ॥८१॥ उवाच दुर्गा
संत्रस्ता शुष्ककंठौष्ठतालुका ॥ पुटांजलिपुता विप्रं ह्रदुपेन विदूयता ॥८२॥ पार्वत्युक्त ॥ गोमूल्यं मत्पति स्वा
दे५ मीनिति वेदे निरूपितं ॥ गवां लक्षं प्रयच्छामि हि मत्स्वामिनं द्विजाः ॥८३॥ तदा तस्याभिविज्ञभ्यो दानानि
विविधानि च ॥ आत्महीनो हि देहः किं किं कर्मकर्तुमीश्वरः ॥८४॥ सनत्कुमार उ० ॥ गवां लक्षेण मे देवि वि
प्राणानां किं प्रयोजनं ॥ ददाति मल्लरत्नंच गवां प्रसर्पणेन कः ॥८५॥ स्वे स्वे स्वस्वस्वत्वं कर्त्ता सत्तः सर्वे जग
त्त्रये ॥ कर्तुं देवस्मितं कर्म भवे किं वा परेच्छया ॥८६॥ दिगंबरंभरः तस्यापि व्यापि जगत्त्रये ॥ बालका
नां बालिकानां स्मरहं स्मितकारणं ॥८७॥ इत्युक्त्वाभ्रसणः पुत्रो गृहीत्वा शंकरं मुने ॥ सन्निधौ वासयामा
स तेजस्वी देवसंसदि ॥८८॥ दृष्ट्वा शिवं ग्रस्यमाणं कुमारेण च पार्वती ॥ समुद्यता तनुं त्यक्तुं शुष्ककंठौष्ठता
लुका ॥८९॥ विचिंत्य मनसा साध्वी सेयमेव दुरत्ययं ॥ दनेसोभीष्टदेवश्च नचप्राहं फुल्लेप्रते ॥९०॥ एतस्मि
न्नंतरे देवाः पार्वती सहितास्तदा ॥ सद्यो ददृशु राकारो तेजसां निकूरंपरं ॥९१॥ कोटिसूर्यप्रभाढ्यं च प्रज्वलान्श्च
दिशो दश ॥ कैलासशैलं पुरतः सर्वदेवादिभियुतः ॥९२॥ सर्वापर्वतरछन्ने विस्तृतं मंडलं द्रसं ॥ दृष्ट्वा च भगव

॥पा०॥
॥९५॥

द्रूपं तु स्तुवत्स्तत्क्रमेण च ॥१३॥ त्रिविक्र०॥ प्रसादान्निश्च सर्वाणि यल्लोमविवरेषु च ॥ सोयं ते षोडशांशाश्च केवलं
यो महान्विराट् ॥१४॥ अंसोवा०॥ वेदोपवुक्तंस्वयं च परमं सत्यमीश्वरं ॥ स्तोतुं तदपि नु महं शक्तः किं स्तो
मितं सदं ॥१५॥ श्रीमहे०॥ ज्ञानाधिष्ठानदेवाहं स्तौमि ज्ञानपरस्य किं ॥ सर्वानिर्वच्य निर्वंतसां च स्वेच्छा
मयं विभुं ॥१६॥ धर्म०॥ अहं स्य मवतारेषु यद्रूपं सर्वजंतुषिः ॥ किं स्तौमि तेजोरूपं च भक्ता ॥ नु महाविग्र
हं ॥१७॥ देवाद्युचुः ॥ कृवयं तत्कलांशाश्चेतिंतासां स्तोतुमीश्वराः ॥ स्तोतुं न शक्ता वेदाद्यं न शक्ताश्च सरस्व
ती ॥१८॥ मुनयऊचुः ॥ वेदान्यठित्वा विद्वांसो वयं किं वेदकारणं ॥ स्तोतुमीशान वानीशा यंच वाङ्मनसः
परं ॥१९॥ सरस्वऊ०॥ वागाधिष्ठातृदेवी मां वेदंति वेदवादिनः ॥ किंचिन्न शक्ता यां स्तोतुं महो वाङ्म
नसोः परं ॥१००॥ सावित्र्यु०॥ वेदप्रसूरहं नाथ सत्स्त्रानत्कल्लयाधुरा ॥ किं स्तौमि स्त्रीस्वभावेन सर्वका
रणकारणं ॥१०१॥ लक्ष्म्यू०॥ यदुत्रा विष्णुकांताहं जगत्पोषणकारिणी ॥ किं स्तौमि तत्कलास्पृष्टा जग
त्पोषणकारिणी ॥१०२॥ हिमाल०॥ हसंति संतो मां नाथ कर्मणा स्थावरं परं ॥ स्तोतुं समुद्यतं क्षुद्रं किं स्तो
मि स्तोतुमक्षमः ॥१०३॥ क्रमेण सर्वे तं स्तुत्वा देवाधिररपुर्मुने ॥ देव्यश्च मुनयः सर्वे पार्वती स्तोतुमुद्य
ताः ॥१०४॥ धौतवस्त्रजटाभारं बिभ्रती सुव्रताव्रते ॥ प्रेरितापरमात्मानं प्रतारायं शिवेन च ॥१०५॥ ज्वल

॥९५॥
॥रं०॥

दग्निशिखारूपा तेजोमूर्त्तिमयी सती ॥ तपसां फलदा माता जगतां सर्वकर्मणां ॥१०६॥ पार्वत्यु० ॥ हे कृष्ण जा
नासि मां भद्र नाहं त्वां ज्ञातुमीश्वरी ॥ के वा जानंति वेदज्ञा वेदा वा वेदकारकाः ॥१०७॥ त्वदंशास्त्वां न जानंति क
थं ज्ञास्यंति बालिशाः ॥ त्वं चापि तत्त्वं जानासि किमन्ये ज्ञातुमीश्वराः ॥१०८॥ सूक्ष्मात्सूक्ष्मतमो व्यक्तः स्थूला
त्स्थूलतमो महान् ॥ विश्वस्त्वं विश्वतेजस्त्वं विश्वबीजं सनातनः ॥१०९॥ कार्यं त्वं कारणं त्वं च कारणानां च कार
णं ॥ तेजःस्वरूपो भगवान्निराकारो निराश्रयः ॥११०॥ निर्लिप्तो निर्गुणः साक्षी स्वात्मारामः परात्परः ॥ प्र
कृतीशो विराड्बीजं विराड्रूपस्त्वमेव च ॥१११॥ सगुणस्त्वं प्राकृतिकः कलया सृष्टिहेतवे ॥ प्रकृतिस्त्वं पुमां
स्त्वं च त्वदन्यो न कश्चिद्भवेत् ॥११२॥ जीवस्त्वं साक्षिणो भोगी स्वात्मनः प्रतिबिंबकः ॥ कर्म त्वं कर्मबीजं त्वं कर्म
णां फलदो विभुर्भवेत् ॥११३॥ ध्यायंति योगिनस्तेजस्त्वदीयमशरीरिणं ॥ वैष्णवाश्चैव साकारं कमनीयं परा
त्परः ॥११४॥ क्वचिच्चतुर्भुजं रम्यं लक्ष्मीकांतं मनोहरं ॥ शंखचक्रगदापद्मधरं पीतांबरं तथा ॥११५॥
द्विभुजं कमनीयं च किशोरं श्यामसुंदरं ॥ शांतं गोपांगनाकांतं रत्नभूषणभूषितं ॥११६॥ एवं तेजस्विनं भ
क्ताः सेवंते संततं मुदा ॥ ध्यायंते योगिनो यत्तत्कुतस्तेजस्विनं विना ॥११७॥ यत्तेजो बिभ्रतां देवा देवानां
तेजसा पुरा ॥ आविर्भूता सुराणां च प्रसन्ना ब्रह्मणा स्तुता ॥११८॥ निसांतेजःस्वरूपाहं विधृत्य सविग्र
हं विभो ॥ स्त्रीरूपं कमनीयं तद्विधाय समुपस्थिता ॥११९॥ मायया तव मायाहं मोहयित्वा सुरासुरा ॥ निह
स सर्वान्दैत्येंद्रमगमं तं हिमालयं ॥१२०॥ ततोऽहं संस्तुता देवैस्तारकाक्षिणपीडितैः ॥ अभवं दक्षजा मा

।ग०।
॥६५॥

पाः शिवः स्तौति यज्जन्मनि ॥१२१॥ सत्यक्त्वा देहं दक्षपत्नी जाताहं शिवनिंदया ॥ अभवं शैलजायायां शैलेंद्राच्च
स्वकर्मणा ॥१२२॥ अनेककृततपसा प्राप्तः शिवः श्चापि जन्मनि ॥ पाणिं जग्राह मे योगी प्रार्थितो ब्रह्मणा वि
भुः ॥१२३॥ शृंगारजं च तत्तेजो नालब्धं देवमायया ॥ स्तोमित्याभवतेनेशपुत्रदुःखेन दुःखिता ॥१२४॥
व्रतेभवद्विधं पुत्रं लब्धुमिच्छामि सांप्रतं ॥ देवेशा विहिता वेदे सांगेन स्वामिदक्षिणा ॥१२५॥ स्त्यासवेक्षि
पामिं घोदरं पामां कर्तुमर्हसि ॥ इत्युक्त्वा पार्वती तत्र विरराम च नारद ॥१२६॥ भारते पार्वतीस्तोत्रं यः शृ
णोति सुसंयतः ॥ सत्पुत्रं लभते नूनं विष्णुतुल्यपराक्रमं ॥१२७॥ संवत्सरं हविष्याशी हरिमभ्यर्च्य भक्तितः ॥ ति६
सुपुण्यकव्रतफलं लभते नात्र संशयः ॥१२८॥ हरेःस्तोत्रमिदं ब्रह्मन्सर्वसंपद्विवर्द्धनं ॥ सुखदं मोक्ष
दं सारं स्वामिसौभाग्यवर्द्धनं ॥१२९॥ सर्वसौंदर्यबीजं च यशोराशिविवर्द्धनं ॥ हरिभक्तिप्रदं तत्त्व
ज्ञानबुद्धिविवर्द्धनं ॥१३०॥ सुखदं मोक्षदं सारं ज्ञानबुद्धिविवर्द्धनं ॥ [illegible]मेशोभक्तिप्रवणं पुत्रपौत्रविवर्द्धनं
॥१३१॥४५॥ इति श्रीब्रह्मवैवर्त्ते पुराणे नारायणनारदसंवादे गणपतिखंडे पुण्यकव्रते पार्वतीकृतं श्रीकृ
ष्णस्तोत्रं कथनं नाम सप्तमोऽध्यायः ॥७॥ नारायण उ० ॥ पार्वतीस्तवनं श्रुत्वा श्रीकृष्णः करुणानिधिः ॥ स्व
रूपं दर्शयामास सर्वस्वरूपं सुदुर्लभं ॥१॥ स्तुत्वा देवी ध्यानमग्ना ददर्शैकमयं तासु मानसा ॥ ददर्श तेजसां मध्ये
रूपं संसारमोहनं ॥२॥ सद्रत्नसारनिर्माणे हिरक्केण परिष्कृते ॥ पुष्पमालि श्यामालापि रत्नपूर्णमनोरथे ॥३॥

॥६६॥
ख०

वह्निशुद्धकपिताशुवरंवंशीकरंपरं ॥ वनमालागलश्यामंरत्नभूषणभूषितं ॥४॥ किरीटरत्नवयसंवेष
विचित्रंचंदनोक्षितं ॥ चारुस्मितास्यमाधंतत्सारंनंदुविनंदकं ॥५॥ मालतीमाल्यसंयुक्तंमधुरस्फुरछुर
उद्धं ॥ गोपांगनापरिवृत्तंराधावक्षस्थलोज्वलं ॥६॥ कोटिकंदर्पलावण्यंलीलाधाममनोहरं ॥ अती
वहृष्टंसर्वेशंभक्तानुग्रहकारकं ॥ दृष्ट्वारूपंरूपवतीपुत्रंतदनुरूपकं ॥ तपसावरयामासवरसंप्रापल
क्षणं ॥८॥ वरंदत्वावरेशस्तंयद्यन्मनसिवांछितं ॥ दत्वाभीष्टंसुरेभ्यश्चतत्रैवांतरधीयत ॥९॥ कुमा
रंबोधयित्वातुदेवीदेवंदिगंबरं ॥ ददौनिरूपमंतत्रप्रहर्षोवैरूपान्वितः ॥१०॥ ब्राह्मणान्भोजयामास
देवांश्चपर्वतांस्तथा ॥ शंकरःपूजयामासचोपहारैरनुत्तमैः ॥११॥ दुंदुभिंवादयामासकारयामासमं
गलं ॥ संगीतंगाययामासहरिसंबोधिसुंदरं ॥१२॥ व्रतंसमाप्यसादुर्गादत्वादानानिसुस्मिता ॥ सर्वांश्चपो
जयित्वातुबुभुजस्वामिनासह ॥१३॥ तांबूलंचवरंरम्यंकर्पूरादिसमन्वितं ॥ क्रमाप्रदत्वापसर्वेभ्योबु
भुजेतेनकौतुकात् ॥१४॥ पर्यंकेनमिभांशायांरम्यांसद्रत्ननिर्मितां ॥ पुष्पचंदनसंयुक्तांकस्तूरींकुंकुमा
न्वितां ॥१५॥ रहसिस्वामिनासार्द्धंसुष्वापपरमेश्वरी ॥ केलासद्वेपेकृदुर्गाचरम्यंनंदनकानने ॥१६॥ विजहा
रंसुरसिकातत्रेतेनसहांबिका ॥ रतःपतनकालेचसोपिविष्णुःस्वमायया ॥१७॥ विधायविप्ररूपंचमाजगा
मरतेर्गृहं ॥ रूक्षमस्तंविनातैलंकुचैलंभिक्षुकंमुने ॥१८॥ अतीववृद्धंकृशानंतृषयापरिपीडितं ॥ अतीवस्त्ररागा

॥ग०॥
॥१७॥

त्रं च बिभ्रतिल्लकक्षजालं ॥१९॥ बहुकाकुस्वरं दीनं दैन्यकुत्सितमूर्त्तिमत् ॥ आलुहाव महादुःखमतिव्यग्रो ऽन्वया
न्वयः ॥२०॥ दृडायलं बनं घस्यारत्ति मारत्नुदुर्बलः ॥ श्रीसूतउ० ॥ किं कृतोषी महादेव हे तात करुणानिधे ॥२१॥
पत्रूप वृद्धं जराग्रस्तं त्वया परिपीडितं ॥ प्रातरूत्तिष्ठ मापन्नं भय छवाशितं जलं ॥२२॥ अनंतरं स्नो ऽस्य
जे रक्ष मां शरणागतं ॥ मातर्मातर्जगन्मातरे हि नाहं नृहा दुहि ॥२३॥ आजगाम रतिधारं पार्वत्यास
हशंकरः ॥ दृष्ट्वा ब्राह्मणं दीनं जरया परिपीडितं ॥२४॥ दृष्ट्वा तु चितगात्रं च बिभ्रतं दंडपानतं ॥ तपस्वि
नं प्रशांतं च शुष्ककंठौष्ठतालुकं ॥२५॥ कुर्वंतं परया भक्त्या प्रशस्तं स्तवनं तयोः ॥ प्रसाद दृष्ट्वा च नंतत्र नील
कंठः सुरोत्तमः ॥२६॥ उवाच परया प्रीत्या प्रसन्नस्तं हरस्वच ॥२७॥ शंकरउ० ॥ महंते कुशलं विप्र वर्षय दवे द्विजं
वरौ विन्नाम भयतः क्षिप्रं तानु मिच्छामि सांप्रतं ॥ पार्वत्यु० ॥ आगतो ऽसि कुतो विप्र मम भाग्यादुपस्थितः ॥२८॥
॥२७॥ अद्य मे सफलं जन्म ब्राह्मणो मम हे ऽतिथिः ॥ अतिथिः पूजितो येन त्रिजगत्तेन पूजितं ॥२९॥ तत्रैवाधिष्ठिता
देवा ब्राह्मणा गुरवो द्विजः ॥ तीर्थान्यतिथिपादेषु राश्यत्तिष्ठंति निश्चितं ॥३०॥ तत्पादधौततोयेन सिंचिता
निखिलामही ॥ संस्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः ॥३१॥ अतिथिः पूजितो येन स्वासिरात्स्यापथो
चितं ॥ महादानानि सर्वाणि कृतानि तेन भूतले ॥३२॥ अतिथिः पूजितो येन भारते भक्तिपूर्वकं ॥ नाना
प्रकारकुल्पानि वेदोक्तानि च यानि च ॥३३॥ तानि वातिथिसेवायाः कलां नार्हति षोडशीं ॥ अपूजितो ऽतिथि

॥१७॥
॥रंव॥

यैस्वप्रभवनाद्धि निवर्त्तते ॥३४॥ पितृदेवाग्नयः पश्चात्गुरवो यांस्य परजिताः ॥ यानि कानि च पापानि ब्रह्महत्या
दृतानि च ॥३५॥ तानि सर्वाणि नश्यंते नान्यपश्यंति यदीश्वरं ॥ ब्राह्मण० ॥ ज्ञानासि वदान्वेदुत्वेदोक्त
कुरूपतनन ॥३६॥ भुजंगस्यापीडितो मार्त्तंडं चैव ग्रसतो श्रुतं ॥ व्याधियुक्तो निराहारो यदा वानन्नानन्नतीत ॥३७॥
मनोरथेनोपहारं भोक्तुमिच्छामि मानवः ॥ पार्वत्युवाच ॥ भोक्तुमिच्छसि किं विप्र त्रैलोक्ये परसुदुर्लभं ॥३८॥ भोक्तु
मिच्छसि महाक्षान्न जो भस फलं कुरु ॥ ब्राह्मण० ॥ ब्रतैसुब्रतयासर्वमुपहारं समाहृतं ॥३९॥ नानाविधं
यमिष्टं च भोक्तुं सोऽसमागतः ॥ सुब्रतेतलवपुश्चोहमयेनां परअपि बपसि ॥४०॥ नत्वामिष्टानि त्रैलोक्ये
दुर्लभानि च संति हि ॥ गीतास्तुः पंचविधाः प्रोक्ता मातरो विविधा स्मृताः ॥४१॥ पुत्राः पंचविधाः सात्त्विक
पिता वेदवाद्भिः ॥ विद्यातो दोभदाता च भयात्राता च जन्मदः ॥४२॥ कन्यादाता च वेदोक्ता नराणां पितरः
स्मृताः ॥ गुरुपत्नी गर्भपत्नी स्तनदात्री पितुः सुताः ॥४३॥ धर्मपुत्रा श्चयचरा रावीर्यजो धनभागिति ॥
भुजंगस्यापीडितो मातर्वद्रोहे शरणागतः ॥४५॥ संप्रतं तव वंध्यायां अनाथः पुत्र एव च ॥ पिष्टकं परमा
न्नंच सुपक्वानि फलानि च ॥४६॥ नानाविधानि मिष्टानि कोलदेशोद्भवानि च ॥ पक्वान्नं स्वस्तिकं क्षीरं
मिक्षुमिक्षु विकारकं ॥४७॥ घृतं दधि च यच्चान्यं घृतपक्वं च व्यंजनं ॥ लड्डुकानि तिलान्नं च मिष्टान्नं स
गुडं निच ॥४८॥ मयाऽसुसान्निव स्तुनिसुधया सर्वमीश्वरी ॥ तांबूलं च वरं स्यक्कूर्पदि सुवासितं ॥४९॥ जलं

१ २ स्वश्रुर्माता सपत्नी च पुत्रभार्या च दापिकाः ॥
भृत्यः शिष्यश्च पुत्रश्च पुष्यश्च शरणागताः ॥४४॥

नि

सुनिर्मलं स्वादु द्रव्यांतरसुवासितं ॥ द्रव्याणि यानि भुक्त्वापेच्चारूलं बोद्धरं भवेत्॥५०॥ अनंतरत्नेभ्द्
वजेन्द्रानि मत्त्यं प्रदास्य हि ॥ स्वामिते त्रिजगत्कर्त्रा प्रदत्ता सर्वसंपदा ॥५१॥ महालक्ष्मीस्वरूपात्वे सर्वै
श्वर्यप्रदायिनी ॥ रत्नसिंहासनं वस्त्रं सपुष्पं रत्नभूषणं ॥५२॥ वन्हिशुद्धांशुकं चारुप्रदास्यति सुदुर्ल
भं ॥ सुदुर्लभं हरेर्मंत्रं हरेर्योगसिंहदासति ॥५३॥ हरेःप्रिया हरेःशक्तिस्त्वमेव सर्वदा सदा ॥ ज्ञानं मत्स्यं
तं पनाम हास्वराप्तिं सुखप्रदं ॥५४॥ सर्वसिद्धिंच विंपातरदेयं स्वसुतायच ॥ पुनःसुनिर्मलं दत्त्वा धर्मंत
पसि संततं ॥५५॥ कृदिब्रसि सर्वपरे न कामिजन्महेतुके ॥ स्वकामात्कुरुते कार्यं कर्मणो भोगतस्वेच ॥५६॥
शुभाशुभो फले द्वे यो तोहेतु सुखदुःखयोः ॥ दुःखं न कस्माद्भवति सुखं वा जगदंबिके ॥५७॥ सर्वस्य
कर्मणो भोगतेन तद्विरतो बुधः ॥ कर्मनिर्मूलयंत्येव संतो हि संततं सदा ॥५८॥ हरिभावनया शु
ध्यात्तपसा भक्तिसेगतः ॥ इंद्रियद्रव्यसंयोगसुखं चापि ध्वंसनावधि ॥५९॥ हरिसंलापरूपं च सुखं तत्
सर्वकालिकं ॥ हरिस्मरणशीलानां नामायुर्यातिसत्तां सति ॥६०॥ न तेषां मीश्वरेः कालो नन्यप्रस्वं जयोध्रु
वं ॥ सेवनं संततं भक्त्या भासंते चिरजीविनः ॥६१॥ सर्वसिद्धिंच विज्ञाय स्वधर्मेर्वणिमादिनेः ॥ जाति
स्मरा हरेर्भक्ता जानंति ज्ञानदिशभक्तितः ॥६२॥ कथयंति कथां जन्म लभते स्वेच्छया भुवा ॥ परंपुण्यंतिते रत्ना
स्तीर्थानि स्पावलीलया ॥६३॥ पुण्यक्षेत्रेत्रसेवायेपरायंच भ्रमंति ते ॥ वैष्णवानां पदस्पर्शात्सद्यः पूता वसु

॥१८॥
स्वं०॥

२३ प्रा ४ ६३ नं २

लरूपं विधायसः ॥ ७८ ॥ +४

धरा ॥ ६४ ॥ तस्ते दोहनमात्रं च तीर्थं पवित्रं वसंति से ॥ गुरोरास्याद्धि सुमंत्रः श्रुतो यस्य प्रविरपत्ति ॥ ६५ ॥ तं वैष्ण
वं तीर्थरूपं तं वदंती ते पुराविदः ॥ पुरुषाणां शतं पूर्वमुद्धरंति शतं परं ॥ ६६ ॥ लीलया भारते भक्त्या सोदरा मातरं
तथा ॥ मातामहानां पुरुषान् त्रायत्यीन्दु त्रायपरान् ॥ ६७ ॥ मातुः प्रसरमुद्धरंति दारुणाद्यमताडनात् ॥ भक्तदर्शनि
पाश्लेषमानवाः प्राप्नुवंति वै ॥ ६८ ॥ तैः स्नाताः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षिताः ॥ न लिप्ताः पातकैर्भक्ताः सततं ह
रिमानसाः ॥ ६९ ॥ यथाग्नयः सर्वभक्ष्या यथा पारक्ष्येषु वायवः ॥ त्रिकोटि जन्मनां जंतुः प्राप्नोति जन्म मानवं
प्राप्नोति भक्तसंगं स मानुष्यकोटिजन्मतः ॥ यभक्तसंगाद्भक्तेश्च कुच्छ्री [illegible]विनः संति ॥ ७१ ॥ अभक्तदर्शनादेव
स च प्राप्नोति शुक्लतां पुनः प्रकृष्टतां याति वै छुयागापमाश्रतः ॥ ७२ ॥ अंकुरस्था विनाशी च वर्द्धिलिपत्तिजन्मनि
महति प्रलयेनाशेन भयं तस्य विश्वितं ॥ सर्वस्वैश्वर्यसंहारे ब्रह्मलोकस्य ब्राह्मणः ॥ तस्मान्नारायणो भक्तिं देहि ना
रायणो विके ॥ न भवेद्धि कुभक्तिश्च विष्णुमायावयाविना ॥ त्यक्त्वा लोकसिध्यर्थं च जन्मस्तवपजनं ॥ ७६ ॥ स
वेबांफल दात्रीं च निस्यरूपा सनातनं ॥ गणेशारूपं श्रीहरि वैकल्ये कल्ये तवासजः ॥ ७७ ॥ जगाम पार्वती तल्पमं
दिराभ्यंतरस्थितं ॥ तल्पस्थे शिवबीर्यमिश्रितः सब [illegible] भवह ॥ ७९ ॥ दद्दर्शांसो हरिः स्वरं प्रसुतो बालको यथा ॥
शुद्धचंपकवर्णाभः कोटिचंद्रसमप्रभः ॥ ८० ॥ सुस्वदस्यः सर्वजनेश्यक्षुरस्मिविवर्द्धकः ॥ अतीवसुंदरतनुः आ
पदेव विमोहनः ॥ ८१ ॥ सुरूपनिरूपमं बिभ्रछारदेदुनिर्मिंदकं ॥ सुंदरे लोचने बिभ्रव्धारूपं प्रविनिंदते ॥ ८२ ॥ ओ
४+ त्यक्त्वाऽमागतं क्षिप्रमिसाक्षात

रधीपत ॥ हकांतधमि ॥ मीराश्यंबा

ग० ॥
॥११९॥

शाधरः कुंद बिभ्रत्तत्कबिंबविनिंदकं ॥ कपालं च कपोलं तदतीवसुमनोहरं ॥८३॥ नासाग्रं रुचिरं बिभ्रमुडेंदुचंद्र
निंदकं ॥ नेत्रे ते च्येक निरूपमं सर्वांगं बिभ्रदुत्तमं ॥८४॥ शयानं शयने रम्ये प्रेरयन्हस्तपादकं ॥ गंडस्थास्वेदनिंदंतिस
मनुष्वांसोमालय ॥८५॥५ ॥ इति श्रीब्रह्मवैवर्ते म० नारायणनारदसंवादे गणपतिखंडे गणेशोत्पत्तिर्नामाष्टमो
४ ना लीलया ॥ चिक्षेप रामोँ गास्त्रं दुर्निवार्यं भयंकरं ॥१३॥ गारुडेन महाराजः प्रेरयामास लीलया ॥
माहेश्वरं च भगवांश्चिक्षेप भृगुनंदनः ॥१४॥ निर्वापयामास राजा वैष्णवास्त्रेन लीलया ॥ भृगु
श्चिक्षेप ब्रह्मास्त्रं न्यपतन्नाशाय नारद ॥१५॥ ब्रह्मास्त्रेण च भूपस्य प्रापैनं रणे ॥ हुतेन हुतं यच्छूलं निर्वापद
मव्ययं मंत्रपूर्वकं ॥१६॥ जग्राह राजा समरे पर्शुं रामवधाय च ॥ शूलं दुहूरी रामश्चरालसर्पस
मप्रभं ॥१७॥ प्रलयाग्निशिखोद्दिप्तं दुर्निवार्यं सुरैरपि ॥ पपात शूलं समरे रामस्योपरि नारद ॥१८॥
मूर्छामवाप स भृगुः पपाते च हरिं स्मरन् ॥ पतिते पर्शुरामे च सर्वे देवा भयाकुलाः ॥१९॥ आज
ग्मुः समरे तत्र ब्रह्मा विष्णुर्महेश्वरः ॥ शंकरश्च महाज्ञानि महाज्ञानेन लीलया ॥२०॥ भार्गवं जी
सपार वयामास तर्णं नारायणोँ ॥ भृगुश्चचेतनां प्राप्य ददर्श पुरतः सुरान् ॥२१॥ प्रणनाम परं भक्त्या ल
ज्जानम्रास्यकंधरः ॥ राजा दृष्ट्वा सुरेशांश्च भक्तिनम्रात्मकंधरः ॥२२॥ प्रणम्य चोरसा मूर्ध्नी
तुष्टाव परमेश्वरान् ॥ तेजो जगाम भगवान् तत्रैवो रणस्थले ॥२३॥ विप्ररक्षानिमित्तेनैव भा
×१ हरपालु भक्तिवत्सलः ॥ भृगुः पाशुपतास्त्रं च जग्राह कोपसंभुतः ॥२४॥ हत्तदुतेन हृदैन ×१

॥ग०॥
॥ ८६ ॥

२३ यस्तः ऽरतं च संग्रामे त्वयाहं मर्दितो ऽधुना ॥ जिताः सर्वे च राजेंद्राः जीवन्नारावणो ऽजितः ॥ २४ ॥ जितो ऽहं दुन्तभ्रा
ऽनेन संप्रभुनाजीवित ऽपुनः ॥ राप स्वं च नं रुक्मा राजा परमधार्मिकः ॥ २५ ॥ मद्भ्रिविनम्युतं भक्त्या यथार्थे विष्णुबाध्य हग
धस्तं भितो रणे ॥ दृदुत्रीस्तं भितो राममोराजानंदनमर्दितं ॥ २४ ॥ नाना पार्षदसु केतन स्वच्छेन राजि
तें रणे ॥ सुदत्रीनं प्रज्वलंतं भ्रमणं कुर्वता सह ॥ २५ ॥ स स्थिते नसत्त तेने व भ्रम्मा विष्णु महे
श्वरैः ॥ गोपालेश्वरात पुत्रेन गोपवेष विधायिना ॥ २६ ॥ नवीन जलद श्यामेन वंशीहस्तेन नारे
द ॥ रातस्मिन्नं तरे तत्र वाग्बभूवाशरीरिणि ॥ २७ ॥ हत्तेन दत्तं कवचं दत्त्रस्य परमात्मनः ॥
राधोत्सितदक्षिणे बाहौ सद्भूनं गुप्तिकारिक्वितं ॥ २८ ॥ गृहीते कवचे शंभो भिक्षायां योगि
नां गुरो ॥ तेहातं ऽपपंत्रा त्री भृगुश्रेति च नारद ॥ २९ ॥ शंभुना भूगवेदत्तं घरसुस्य कवचं
चयतो ॥ श्रुत्वाचाशरीरिणीं वाणीं श्रंकरो द्विजरूपधृक् ॥ ३० ॥ भिक्षां ऽर वालकवच मानी यच
ऽपस्वं च ॥ ततस्मिन्नंतरे देवा जग्मुः स्वस्थानमुत्तमं ॥ ३१ ॥ उवाच पशुरामश्च राजानं सम
रं प्रति ॥ परशुराम ॥ राजेंद्र तिष्ठ समरं कुरु साहससर्वकं ॥ ३२ ॥ कालभैरवे जयो [illegible] सा वै ती
दुजयोन्त्रपः ॥ अधीतं विधिवद्दत्तं ऽरस्नातं पृथ्वी सुराः सिता ॥ ३३ ॥ ओं गताः कतिविधं भक्तपा
मादृस्त्रा धरणीतले ॥ कृद्धिसो जो विश्व मश्च विविधां रणमंत्रणं ॥ ३४ ॥ श्री रेश्वर्यं पितृ या दृ
ने ज्ञान शास्त्रिश्यचौ किंश ॥ आचारो विनयो विद्या प्रतिष्ठा परमं तपः ॥ ३५ ॥ सर्वे मनो

गजौना ॥ श्रिमधीतं च यद्विं दत्तं गागापथ्वी
सुरा श्रीता ॥ ३६ ॥ ५३

॥ ८६ ॥
॥ स्कं० ॥

पो१ रमारंगेगतात्वंच ममप्रभो॥साचश्रीःप्राणतुल्यामेसाध्वीप्राणांन्तासंभवा॥३६॥ यज्ञेच पत्नीमात्रेचस्ने
हेश्रीडनेसंगिनी॥ आबाल्यात्संगिनीत्वञ्च छयनेभोजनेरणे॥३७॥ तांविनाप्राणहीनोहंविषही
पो२ नोयथोरगः॥यथापानदरुगृहं मेपुरेवंशोचनस्थिता॥३८॥ द्वितीयाशौनकाविप्रहतोहंब्राम्हणेनच॥ चर
कालेसिंहःस्तगालंच स्तगालःसिंहमेवच॥३९॥ कालेव्याघ्रंनरोहंति गजेंद्रंहरिणस्तथा॥ महिषं
मक्षिकाकाले गरुडंच तथोरगः॥४०॥ किंकरस्तौतिराजेंद्रं कालेराजाच किंकरं॥ इंद्रश्चमनवःका
लेक्षीयेब्रह्मामरिष्यति॥४१॥ तिरोभूताचप्रकृतिःकालेश्रीकृष्णविग्रहे॥ मरिष्यंतिसुराःसर्वेत्रि
लोकस्थाश्चराचराः॥४२॥ सर्वेकालेलयंयांति कालोहिदुरतिक्रमः॥ कालस्यकालःश्रीकृष्णः
स्रष्टुस्रष्टायथेच्छया॥४३॥ संहर्त्ताचेसुसंहर्त्तुःपातुःपाता परात्परः॥ महान्स्थूलात्स्थूलतमःसू
क्ष्मात्सूक्ष्मतमःस्मृतः॥४४॥ परमाणुसमःकालः कालश्चैकोपिदकः॥ यस्यलोमानिविश्वानिस
पुमांश्चमहान्विराट्॥४५॥ तेजसासोडशांशश्च कृष्णस्यपरमात्मनः॥ ततोहरिर्गोलोकेसकृष्ण
यसपार्षदं॥४६॥ गोपगोपीपरिवृतं द्विभुजंमुरलीकरं॥ रत्नसिंहासनस्थंच राधावक्षस्थलेस्थि
तं॥४७॥ दृष्ट्वानुसंस्तुहीत्याच प्रणम्यच उनःउनः॥ ईश्वरेच्छांचविज्ञायससृष्टिंहिमनोदधे॥४८॥
पः शिवःसृष्टिसंहर्त्तासिचस्रष्टुर्ब्रह्मात्मजः॥ विष्णुःपाताक्षुद्रविराट्सप्तद्वीपनिवासकृत्॥४९॥

सृष्टिकारणभूताश्च ब्रह्मविष्णुमहेश्वराः॥ संति विश्वेषु सर्वेषु श्रीकृष्णस्य कलोद्भवाः॥५०॥ तेन
देवाः प्राकृतिकाः प्राकृतश्च महाविराट्॥ सर्वान्प्रसूतां प्रकृतिं श्रीकृष्णः प्रकृतेः परः॥५१॥ नक्षमः
परमात्मापि तां शक्तिं प्रकृतिं विना॥ सृष्टिं विधातुं मायेशो न सृष्टिर्मायया विना॥५२॥ साच कृष्णे
तिरोभूता सृष्टिसंहारकारके॥ साविर्भूता सृष्टिकाले साच नित्या परेश्वरः॥५३॥ कु
लालश्च घटं कर्तुं यथाशक्तो मृदं विना॥ स्वर्णं विना स्वर्णकारः कुंडलं कर्तुमक्षमः॥५४॥
साशक्तिः सृष्टिकाले च पंचधा चेश्वरेच्छया॥ राधा पद्मा च सावित्री दुर्गा देवी सरस्वती॥५५॥
प्राणाधिष्ठातृदेवी च कृष्णस्य परमात्मनः॥ प्राणाधिकप्रियतमा सा राधा परिकीर्तिता॥५६॥
ऐश्वर्याधिष्ठातृदेवी च सर्वमंगलकारिणी॥ परमानंदरूपा च सा लक्ष्मीः परिकीर्तिता॥५७॥ वि
द्याधिष्ठातृदेवी च सर्वशक्तिस्वरूपिणी॥ सर्वज्ञा सांबिका सैव दुर्गा दुर्गतिनाशिनी॥५८॥ वागा
धिष्ठातृदेवी या शास्त्रज्ञानप्रसूतिका॥ कृष्णकंठोद्भवा या च साच देवी सरस्वती॥५९॥ पंचधा
सा स्वयं देवी मूलप्रकृतिरीश्वरी॥ ततः सृष्टिक्रमेणैव बहुधा कृष्णया च सा॥६०॥ योषितः प्र
कृतेरंशाः पुमांसः पुरुषस्य च॥ मायया सृष्टिकाले च तद्विधानं भवेद्भवः॥६१॥ सृष्टिश्च प्र

८३

तिविश्वे च भस्माभस्मोद्भवः सदा ॥ पाता विष्णुश्च संहर्त्ता शिवः स्वाश्च शिवः प्रभुः ॥ ६२ ॥ इत्युक्तं ज्ञा
नतिदं राममस्त्वं चतुर्भुजरे ॥ दीक्षाकाले च मध्याने मुनिप्रवरसंनिधौ ॥ ६३ ॥ इत्युक्त्वा कार्त्तवीर्यश्च
रामं नत्वा च सस्मितः ॥ आरूरोह रथं श्रीघ्रं गृहीत्वा सशरं धनुः ॥ ६४ ॥ रामस्ततो राजसैन्यं ब्रह्मा
स्त्रेण जघान ह ॥ नृपं पाशुपतेनैव लीलया श्रीहरिं स्मरन् ॥ ६५ ॥ एवं त्रिसप्तकृत्वश्च यत्क्रमेणं च व
सुंधरां ॥ रामश्चकार निर्भूपां लीलया च हरिं स्मरन् ॥ ६६ ॥ गर्भस्थं मातृक्रोडस्थं शिशुं वृद्धं च मध्य
मं ॥ जघान क्षत्रियं रामः प्रतिज्ञापालनाय च ॥ ६७ ॥ कार्त्तवीर्यश्च गोलोकं जगाम कृष्णसंनिधिं ॥
जगाम परशुरामश्च स्वालयं श्रीहरिं स्मरन् ॥ ६८ ॥ त्रिःसप्तकृत्वो निर्भूपां महीं कृत्वा महेश्वरः ॥ परशुना
रमणं दद्वा परशुरामं चकार तं ॥ ६९ ॥ देवाश्च मुनयो देव्यः सिद्धगंधर्वकिन्नराः ॥ सर्वे चक्रुः पुष्पवृ
ष्टिं राममूर्द्धि च नारद ॥ ७० ॥ स्वर्गे दुंदुभयो नेदुर्हस्त्राद्वैव भ्रूकृसा परशुरामस्य परासा वभवपुरि
तं जगत् ॥ ७१ ॥ ब्रह्मा भृगुश्च शुक्रश्च च्यवनो वाल्मिकिस्तथा ॥ जमदग्निर्भृस्पलोधाहाजगुश्च म
हर्षिताः ॥ ७२ ॥ पुलकांकितसर्वांगाः सानंदाश्रुसमन्विताः ॥ दुर्वापुष्पांकुराः सर्वे कुर्वंतो मंगलाशिषं ॥ ७३ ॥
प्रणनाम च तान् रामो दंडवत्पतितो भुवि ॥ क्रोडे चकार ब्रह्मा हेऽयमाभातेति संस्तुवन् ॥ ७४ ॥ तमुवा
च स्वयं ब्रह्मा परशुमं जगद्गुरुः ॥ हितं मितं वेदसारं परिणामसुखावहं ॥ ७५ ॥ ब्रह्मोवाच ॥ शृणु राम प्रव

॥गु०॥
॥७८॥

×+लब्ध्वा च निर्मलं पद्मपीठो वा बंधस्ततः परः ॥ गुरुदत्तं च मंत्रं च अक्षापंक्तं ततो जपेत् ॥८५॥×४

मि सर्वसंपत्करं परं ॥ कण्वस्य स्वोक्तवचनं सर्वदेवेषु संमतं ॥७६॥ पूज्यानामेव सर्वेषां मित्रः पूज्यत
मो वरः ॥ अनेककोटिजन्मानां तथा पालनाद्ये पितास्मृतेः ॥७७॥ गरीयान् जन्मदातुश्च सोऽन्नदाता पिता गु
रुः ॥ विना तेनाश्वरो देहो न निःस्वं पितुरुस्वः ॥७८॥ तपोशतगुणं पूज्या मान्या च वै हिता ॥ गर्भ माता
धारणपोषाभ्यां सा च ताभ्यां गरीयसी ॥७९॥ तेभ्यः शतगुणं पूज्यो भीष्टदेवः श्रुतोश्रुतः ॥ ज्ञा
नविद्यामंत्रदाताभीष्टदेवात्परो गुरुः ॥८०॥ गुरुर्वै गुरुरुत्कृष्ट गुरुरूपस्ततोधिका ॥ देवे रुष्टे
गुरू रक्षेद्गुरौ रुष्टे न कश्चन ॥८१॥ गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ॥ गुरुरेक परब्र
ह्म तस्मै श्री गुरवे नमः ॥८२॥ ब्राह्मणेभ्यः प्रियः परः ॥ — — — — ॥ गुरुर्ज्ञानं हृद
स्यैव ज्ञानं च हरिभक्तिदं ॥८३॥ हरिभक्तिप्रदाता यः को वा बंधुस्ततः परः ॥ अज्ञानतिमिरांधस्य
यो ज्ञानदीपप्रदो भवेत् ॥८४॥ सर्वज्ञत्वं च सिद्धिं च को वा बंधुस्ततोधिकः ॥ सुखं जयति सर्वत्र
विघ्नपा गुरुदत्तया ॥८५॥ मया पूज्यो पितं गति को वा बंधुस्ततोधिकः ॥ विद्याधो वा धनाधो वा
यो मूढो न भजेद्गुरुं ॥८६॥ ब्रह्महत्यादिकं पापं लभते नात्र संशयः ॥ दरिद्रं पतितं क्षुद्रं नरकं ध्याचरे
गुरुं ॥८७॥ सोऽशुचिः स्याद्धि प्रतिष्ठितो पिता धिक्कारिचकर्मसु ॥ अभिष्टदेवो श्रीहरिर्गुरुस्तोत्राकरः ॥७८॥
॥खं०॥

ला ७

स्वपं ॥८८॥ शरणं गच्छेत्त्वंरेवा [illegible] तमं गुरुः ॥ त्रिःसप्तकृत्वो निर्भूपां सपापथ्वीकृताय
तः ॥८९॥ प्राप्ताश्च ग्राहरे भर्त्तिरस्तं शिवं शरणं व्रज ॥ शिवं तु शिवरूपं च शिवदं शिवकारणं ॥९०॥ शिवारा
२३ ध्यं शिवं शांतं गुरुं तं शरणं व्रज ॥ गोलोकनाथो भगवान्सर्वतो निपद्मजः ॥९१॥ प्रद्युम्नदेवः सद्गुरुः सामेव
जी४ शरणं व्रज ॥ आत्मारामः शिवो ज्ञानं पनोहं स [illegible] विष्णु ॥९२॥ प्राणाधिष्ठातृप्रकृतिः सर्वशक्तिप्रसूता सुत ॥
ज्ञानं ज्ञाननरूपं च ज्ञानबीजं सनातनं ॥९३॥ [illegible] रूपं [illegible] कालं तं गुरुं शरणं व्रज ॥ ब्रह्मज्योतिःस्वरूपं
तं भक्तानुग्रहविग्रहं ॥९४॥ शरणं व्रज सर्वेशं भगवंतं सनातनं ॥ प्रकृतिर्वै क्षवंध्य तपस्तप्ताय मीश्वरं ॥९५॥
कांतं प्रपद्यतिं भेतं गुरुं शरणं व्रज ॥ इत्युक्त्वा मुनिभिः सार्द्धं जगाम कमलोद्भवः ॥९६॥ रामश्च गंतु
कैलासं मनश्चक्रे च नारद ॥ मया कथितं सर्वं ब्रह्मपुत्र [illegible] श्रुतं तद् ॥९७॥ ॥२९॥ इति श्रीब्रह्मवैवर्ते
म० नारायणना० गणपतिखंडे सहस्रार्जुनपंचत्वप्राप्तिवर्णन पर्शुरामजयवर्णनं नाम चत्वारिंशो
ध्यायः ॥४०॥ नारायण० ॥ हरेश्च कवचं धृत्वा कृत्वा निःक्षत्रियां महिं ॥ रामो जगाम कैलासं नमस्कर्तुं
शिवं गुरुं ॥१॥ गुरुपत्नीं शिवां मातुर्बंधुं गुरुसुतौ च तौ ॥ गणेशं नारायणसमो कार्त्तिकेशगणेश्व
रौ ॥२॥ मनोयायी महात्मा च तीर्थं संप्राप तत्क्षणात् ॥ ददर्श नगरं रम्यमतीव सुमनोहरं ॥३॥ शुद्धस्फ
टिकसंकाशैर्मणिभिः सुमनोहरैः ॥ सुवर्णकलशैर्दीप्तै राजमार्गविराजितं ॥४॥ सिंदूराकारवर्णै

॥ग॰॥
॥७९॥

ध्वयेच्छितं मणिवेदिभिः ॥ संयुक्तं मुक्तनिलयैः परितो मणिमंडपैः ॥५॥ पक्षाणामालयैर्दिव्यैः सं
युक्तं शतकोटिभिः ॥ कपाटैश्च सोपानैः शोभनैर्मणिनिर्मितैः ॥६॥ सुवर्णकलशैर्दिव्यैः स
जितैः श्वेतचामरैः ॥ रत्नकांचनपद्मैर्नयक्षैर्गणवेष्टितं ॥७॥ रत्नभूषणभूषाढ्यैर्दृप्पितैः
सुंदरीगणैः ॥ बालिकाभिर्बालकैश्च चित्रपुत्तलिकारकैः ॥८॥ क्रीडाभिः सस्मितैः शाब्दस्व
पं१५ च्छंदैश्च विराजितैः ॥ पारितंद्रुमगणैः पुष्पैः स्वर्णद्वितिरत्नीरजैः ॥९॥ आकीर्णंपुष्पजातैश्च ना
नाभिश्च सुगंधिभिः ॥ कल्पवृक्षाश्रितैः सिद्धैः कामधेनुपुरस्कृतैः ॥१०॥ सिद्धविद्याधनिपु
णैः पुण्यवद्भिर्निषेवितं ॥ वटवृक्षैरक्षयैश्च त्रिलक्षयोजनोत्सुकैः ॥११॥ शतयोजनविस्तीर्णैः
शतस्कंधसमन्वितैः ॥ असंख्यशाखानिकरैरसंख्यफलसंयुतैः ॥१२॥ नानापक्षिगणाकीर्णै
सुमनोहरशाद्वितैः ॥ कंपितैः शीतवातेन मंदितंच सुगंधिना ॥१३॥ पुष्पोद्यानसहस्रेण सरसांच
शतेनच ॥ सिद्धैर्ज्ञालयवलभैश्च युतं मणिविस्तारजैः ॥१४॥ रामश्चदृष्ट्वानगरमतीवहृष्टमानसः ॥
हृदृश्यैः पुरतोरण्यैस्च युतंचांकरा[illegible]वं ॥१५॥ सुवर्णमित्युशतकैर्मणिभिः स्वर्णवर्णकैः ॥ स्वच्छि
तैः रत्नसारेण रचितं विश्वकर्मणा ॥१६॥ चतुर्योजनविस्तीर्णं त्रिपंचयोजनोत्सुकं ॥ चतुरस्रं

॥७९॥
॥खं॰॥

४२ निशालाक्षं च बाणं च विरूपाक्षं महाबलं ॥ विकटाक्षं भास्कराक्षं रक्ताक्षं विकटोदरं ॥२०॥ संहारभैरवं काळभैरवं च भयंकरं ॥ ४२

चतुष्कोणं प्राकारं सुमनोहरं ॥१७॥ द्वारं रत्नकपाटेन नाना चित्राचितेन च ॥ मुक्तमणीप्रवेशेश्च मणिस्तंभ-
विराजितेः ॥१८॥ तद्दक्षिणे वृषभं च वामे सिंहं च नारद ॥ नंदीश्वरं महाकाळं पिंगळाक्षं भयंकरं ॥१९॥ स-
सुभैरवमीशं च महाभैरवमेव च ॥ हरकोणग भैरवं चैव क्रोधभैरवमुल्बणं ॥२०॥ कपाळभैरवं चैव रुरुभै-
रवमेव च ॥ सिद्धेशांश्च रुद्रगणान्विद्याध्रांगुह्यकास्तथा ॥२१॥ भूतान्प्रेतान्पिशाचांश्च कूष्मांडान्ब्रह्मरा-
क्षसान् ॥ वेताळान्मानवांश्चैव योगिंद्रांश्च जलचरान् ॥ यक्षान्किंपुरुषांश्चैव गंधर्वान्नरांश्च हृद्दहि ॥ तांश्च
द्धानं दिव्यरत्नांगं गृहीत्वा भृगुनंदनः ॥२२॥ तांश्च संभाष्य परं च जगामानंदमानसः ॥ रत्नेंद्रसारनि-
र्मितं ददर्शचित्रामंदिरं ॥२४॥ अमूल्यरत्नकलशैः [illegible]भिश्च विराजितं ॥ अमूल्यरत्नरचितैर्मुक्तानि-
र्मलदर्पणैः ॥२५॥ हीरसारविकारैश्च कपाटैश्च विराजितं ॥ गोरोचनाभिर्मणिभिर्युतं स्तंभसहस्रकैः ॥२६॥
मणिसारविकारैश्च सोपानैः परिसेवितं ॥ ददर्शाभ्यंतरद्वारं नाना चित्रेण चित्रितं ॥२७॥ मुक्ता-
माणिक्यग्रथिते मालाजालैर्विराजितं ॥ ददर्शकार्त्तिकं वामे दक्षिणे च गणेश्वरं ॥२८॥ वीरभद्रं महा-
कायं शिवतुल्यपराक्रमं ॥ प्रधानपार्षदगणान्क्षेत्रपालांश्च नारद ॥२९॥ रत्नसिंहासनस्थांश्च रत्न-
भूषणभूषितान् ॥ तान्संभाष्य भृगुः शीघ्रं महाबलपराक्रमः ॥३०॥ पर्शुहस्तः पर्शुरामो गमनेच्छु-
रुद्यतः ॥ गच्छंतं तं गणेशाश्च भणंतीतिष्ठस्मवाचह ॥३१॥ निद्रितो निद्रयायुक्तो महादेवोधुनेतिच

ज्र्वल ५

॥ग०॥
॥८०॥

इत्थंराज्ञांमहीसाहमत्रागत्यक्षणांतरे ॥३२॥ चपासाद्धं[illegible]गमिष्यामिभ्रातस्तिष्ठेति सांप्रतं ॥ श्रुत्वा
गणेशवचनं पर्शुरामोमहाबलः ॥३३॥ बृहस्पतिसमोवक्ता प्रवक्तुमुपचक्रमे ॥ शृणुनारदवक्ष्या
मिश्रवणंकुरुभक्तितः ॥३४॥ ॥[illegible]॥ इतिश्रीब्रह्मवैवर्ते म० आ० रायणना० गणपतिखंडे एकच
त्वारिंशोध्यायः ॥४१॥ पर्शुरा० ॥ यास्यामंतःपुरंभ्रातः प्रणमंतुमीश्वरं ॥ प्रणम्यमातरंभ
क्त्यायास्यामित्वरितंगृहं ॥१॥ त्रिःसप्तकृत्वोनिर्भूपांकृत्वापृथ्वींचलीलया ॥ प्राप्तवीर्यंगुरुंचद्र
ष्टुंहतोयस्यप्रसादतः ॥२॥ नानाविद्यायुतोलब्धानानास्त्रंसुदुर्लभं ॥ तंगुरुंजगतांनाथंप्र
णमिष्यामिसांप्रतं ॥३॥ सगुणंनिर्गुणंचैवभक्तानुग्रहविग्रहं ॥ नित्यंनिरूपस्वरूपंचब्रह्मज्योतिः
सनातनं ॥४॥ स्वेच्छामयंदयासिंधुंदीनबंधुंमुनीश्वरं ॥ स्वात्मारामंपूर्णकामंव्यक्ताव्यक्तंपरात्परं ॥५॥
परापराणांस्रष्टारंपुरुहूतंपुरुष्टुतं ॥ पुराणंपरमात्मानमीशानमादिमव्ययं ॥६॥ सर्वमंगलमांग
ल्यंसर्वमंगलकारणं ॥ सर्वमंगलदंशांतंसर्वैश्वर्यप्रदंपरं ॥७॥ आशुतोषंप्रसन्नास्यंशरणागत
वत्सलं ॥ भक्ताभयप्रदंभक्तवत्सलंसमदर्शिनं ॥८॥ इत्युक्त्वापर्शुरामश्चतस्थौगणपतेःपुरः ॥ वाचा
मधुरयातत्रसमुवाचगणेश्वरः ॥९॥ श्रीगणेश्वर उ० ॥ क्षणंतिष्ठक्षणंतिष्ठशृणुभ्रातरिदंवचः ॥ र
हस्यंचनिगूढंचनदृश्यःस्त्रीयुतःपुमान् ॥१०॥ स्त्रीपुंसत्वंचपुरुषंयःपश्यतिनराधमः ॥ करोषि

॥८०॥
॥खं०॥

रसभं गवां क्वाप्यस्त्यग्रजे ध्रुवं ॥११॥ तत्रास्ति कुति पार्वत्याः पावकं दिवाकरो ॥ विशेषश्चापि पितरं स्नुरं
वा भास्पतिं द्विजं ॥१२॥ रहः सुरति संसत्त्वं न हि पश्येद्विचक्षणः ॥ क्रामतः क्वोपतो वापि पयः स्वस्पसुरतो
सुखं ॥१३॥ स्त्री विशेषे रोपो वेत्तस्य ध्वंसमसु अन्यसु ॥ श्रोणिं वहस्सख्लं पलकं पः स्वपति परस्त्रियं ॥१४॥
कामतोपि विमर्दश्च [illegible] दोषो भवति निश्चितं ॥ गणेशस्य वचः श्रुत्वा प्रहस्य षण्मुखं ननः ॥१५॥
तमुवाच महाक्रोधाग्निहुरं वचनं शुभे ॥ पशुरासि ॥ अरे श्रुतं त्वया किंवचनमश्वैर्निति मुत्तमं ॥१६॥ स्व
पिवन यं नैव श्रुतमीश्वर वक्त्रतः ॥ श्रुतो श्रुतं वा स्यापिंद्वाभिनं वा च्यविकर्मिणां ॥१७॥ निर्विकारस्य च
स्वा० त्रिशोर्न दोषः कश्चिद्वह्निः पौंस्पतः पुरा ॥ श्रातसायद्विकं तिष्ठ बालक ॥१८॥ यथा देवं करिष्यामि कार्यं
च समयोचितं ॥ तथैव तातो माता च स्व यथाभिनिरूपितः ॥१९॥ जगतां पितरौ तौ च पार्वतीपरमे
श्वरौ ॥ पार्वतीस्त्रीपुमान्शंभुरिति वेदैर्निरूपिताः ॥२०॥ सर्वरूपः शांभुरस्य सर्वरूपा च पार्वती ॥ गु
णातीतस्य का क्रीडा तस्मै गोप्रकुतोस्ति भो ॥२१॥ क्रीडाच्छ्रद्धाभीतिर्भगो गोत्यास्य स्वनेश्वरस्य च ॥ स्त
नांधं बालकं दृष्ट्वा पित्रोर्व्रीडां कुतो भवेत् ॥२२॥ व्रीडीया श्वकुतो व्रीडाव्रीडो रास्य च बाकुतः ॥ व्रीडा
मवाप्नोति ताभ्यां पश्चिवाहताराने ॥२३॥ ह्रीति तत्सीत महाविप्रचित्तापोत्साह मकृत्य ॥ भीति भरति
मवाप्नोति मत्स्यकमत्स्यकमुपैतीव ॥२४॥ कुतोज्वरं ज्वरो हन्ति व्याधिं व्याधिश्च जीर्यति ॥ संहर्तारश्च संहर्ता

नाशः क्षमाद्विजेतिकिं ॥२५॥ स्वस्यास्यजतिस्वस्यारंपातारंपातियन्मतः ॥ पुष्टिं पुष्टिमवाप्नोतितु
ष्टिःस्तुष्टिःसमांसमा ॥२६॥ आत्मानंपरमात्मास्तिशास्त्रिंशास्त्रिर्बिभेतिच ॥ लोभमोहकामक्रोधाःस्वा
मांननहिबाधिताः ॥२७॥ दृपानैर्बधनंपापघ्नेध्यासंपद्यपांप्रभो ॥ ज्ञानबुध्योःकोविकारोन्य
रैनबाध्यतेज्वरः ॥२८॥ चिंतानचिंतयात्रस्तान्चक्षुःस्वनचपश्यति ॥ हर्षमुद्वंप्राप्नोतिशो
कंशोकेनबाध्यते ॥२९॥ आविपत्तिर्विपत्तेश्च संपत्तिःसंपदःकुतः ॥ मेधायाधारणात्रात्रिःस्यात्तेधीस्म
रणंकुतः ॥३०॥ नदग्धःस्वप्रतापेनविवस्वानितिसंमतः ॥ विपरीतमतोभातस्यपेवचरितोधुना ॥३१॥
नष्टतोयंगुरुस्तस्मान्नदुर्दर्शश्रुतोश्रुतः ॥ इत्युक्त्वापर्शुरामश्चप्रहस्यचपुनःपुनः ॥३२॥ श्रीगुरुं
तुमनश्चश्रीगुरोरस्यंतरंमुदा ॥ पर्शुरामवचःश्रुत्वाप्रीतश्रीधोगणेश्वरः ॥३३॥ शुद्धसत्वविशि
ष्टपाश्वग्रहस्पतमुवाचह ॥ श्रीगणेश्वर० ॥ अज्ञानतिमिरध्वंसोज्ञानंप्राप्नोतिज्ञानिच ॥३४॥ पितुर्भक्ति
युक्त्याज्ञानंदुर्लभंभाग्यवान्लभेत ॥ श्रुतंज्ञानंविशिष्टंचज्ञानिनामपिदुर्लभम् ॥३५॥ श्रुतंज्ञानंविशि
ष्टंचज्ञानिनामपिदुर्लभं ॥ किंचिन्ममप्रदंब्रूहिः शृणुध्यातविधिद्रुतं ॥३६॥ योनिर्गुणःसनिर्लिप्तःशास्त्रि उ
स्योनहिसंवृतः ॥ सिसृक्षुराश्रितःसन्नोनिर्गुणःसगुणोभवेत् ॥३७॥ यावंतिचशरीराणिभोगाहीनि
महामते ॥ प्राकृतानिचसर्वाणिश्रीहरस्ताविग्रहंविना ॥३८॥ ध्यायंतेयोगिनस्तंचसिद्धज्योतिस्वरूपिणं ॥

खंग

हस्तपादादिरहितं निर्गुणं प्रकृतेः परं ॥३९॥ बैष्णवास्तं नमस्यंते तत्पराः सूक्ष्मदर्शिनः । कुतो बभ
वुतज्योतिरहो तेजस्विनं विना ॥४०॥ ज्योतिरभ्यंतरे तच्चशरीरं रूपमसुंदरं । द्विभुजं मुरलीहस्तं स
स्मितं पीतवाससं ॥४१॥ अलीवामत्यसहरत्नभूषणेन विभूषितं । एवं भक्त्याश्य ध्यायंते शाश्वच्चरणा
सेविनः ॥४२॥ योगिनो योगरूपंच कालेभक्ति विपातकाः । ज्योतिरभ्यंतरे मूर्तिं पश्यंति हरपपाप्रतो ॥४३॥
तदादास्ये निपुणास्ते भवंत्येवेश्वरे कृपा ॥ योगस्तपो व्रतादास्यस्य कलां नार्हंति षोडशीं ॥४४॥ यदास्रष्टु
मुखः कृष्णः ससृजे प्रकृतिं पुरा । तयोनावर्षवेदीपं वीर्यं [illegible]बोपवर्णने ॥४५॥ दिव्येनच हस्रवर्षेण ग्गी
गर्भो डिंभो विनिर्गतः । तदा चकार निश्वासं ततो वायुर्बभूव ह ॥४६॥ निश्वासेन समं भ्रातपुरीव
बिंदुर्विनिर्गतः । ततो बभूव सहसा विश्वाधारो महाविराट् ॥४७॥ यावंति गात्रलोमानि तस्य संति
महात्मनः । ब्रह्मांडानि च तावंति विद्यमानानि नित्यश्चेतं ॥४८॥ तत्रच प्रतिब्रह्मांडे ब्रह्मविष्णुमहेश्वराः ।
देवा नराश्च मुनयो विद्यमानाश्चराचराः ॥४९॥ समंताद्विराडाश्रयः सर्वस्यचजनस्यच । निश्वासवा
युर्भगवान्बभूव [illegible]हरे मुने ॥५०॥ महद्विष्णुश्चकृव जातः ततः क्षुद्रविराडभवत् । तन्नाभिकमले ब्रह्माशं
करश्च ललाटजः ॥५१॥ विष्णुः सहंस्राः पालायः श्वेतद्वीपनिवासकृत् । एवंच प्रतिब्रह्मांडे ब्रह्मविष्णु
महेश्वराः ॥५२॥ स्वयंच स्वांशकलया नानामूर्तिधरो हरिः । तदाभवत्स सगुणः सर्वशक्तिसमन्वितः ॥५३॥

कथं ब्रह्मादिरहितः सच स्वेच्छामयो महान्॥ सर्वेशः सर्वरूपो गाहं सर्वशक्तिसमन्वितः॥५४॥ ब्रह्मा
नास्येव ब्रह्मापाः मतो यः सर्वसंमतः॥ या च ब्रह्मावती देवी तस्या ब्रह्मा कुतो गता॥५५॥ सर्वशक्तिः
सती दुर्गा प्रकृत्स्वंत्रा च श्रीकला॥ तस्या ब्रह्मरूपः संति सर्वदा सर्वसंमता॥५६॥ पंचधा या च प्रकृ
तिः श्रीकृष्णस्य बभूव ह॥ राधा पद्मा च सावित्री दुर्गा देवी सरस्वती॥५७॥ प्राणाधिष्ठात्री या देवी श्री
कृष्णपरमात्मनः॥ प्राणाधिका प्रिया सा च राधा स्थिता तस्य वक्षसि॥५८॥ विद्याधिष्ठात्री देवी या सा
वित्री ब्रह्मणः प्रिया॥ लक्ष्मी नारायणस्यैव सर्वसंपत्स्वरूपिणी॥५९॥ सरस्वती द्विधाभूता कृष्णस्य
मुखनिर्गता॥ भारती ब्रह्मणः कांता स्वयं नारायणस्य च॥६०॥ बुद्ध्यधिष्ठात्र्या देवी ज्ञानसः शक्ति
संयुता॥ सा दुर्गा श्रीशिनः कांता तस्या ब्रह्मा कुतो गता॥६१॥ प्रकृतिः पंचधा ख्याता गोविंदच वपुस्तव ब्रेद
हपद्माः प्रधानाः कृष्णपाद्भवानेकधापि सा॥६२॥ विप्रेंद्र नित्यं वैकुंठं ब्रह्मांडात्परमुच्यते॥ अवि
नाशि स्थलं राध्यं प्रभुपप्रकृतिर्वैध्रुवं॥६३॥ तत्र नारायणो देवः चतुर्बाहुश्चतुर्भुजः॥ वनमालीपीत
वासाः॥ रमस्या च पद्मयासह॥६४॥ स्वयं कृष्णश्च गोलोके द्विभुजः श्यामसुंदरः॥ सस्मितो मुरलीहस्तो
राधावक्षस्थले स्थिता॥६५॥ गोगोपगोपीभिः रम्ये संस्थो गोपरूपधृक्॥ परिपूर्णतमः श्रीमानि
र्गुणः प्रकृतेः परः॥६६॥ स्वेच्छामयः स्वतंत्रश्च परमानंदरूपधृक्॥ सुराः कृष्णस्यावयस्य ब्रह्मां

स्तोमहान्विराड्॥६७॥ यतो भवंति विश्वानि स्थूलसूक्ष्मादिकानि च॥ पुनस्तत्र प्रलीयंते रावमिव प्र
बुद्धिहुः॥६८॥ गोलोको वैकुंठादूर्ध्वं पंचाशत्कोटियोजनं॥ नास्ति लोकस्तदूर्ध्वं च नास्ति कृष्णात्परः
प्रभुः॥६९॥ इदं स्तोत्रं वरं शंभुवक्त्राद् दितिहदष्टं बुधाश्रुतं॥ क्षणं तिष्ठाधुना भ्रातरीश्वरः सुरतोत्सुकः॥७०॥
॥७१॥२१२॥ इति श्रीब्रह्मवैवर्ते म॰ नारायणना॰ गणपतिखंडे ज्ञाननिरूपणं नाम द्विचत्वारिंशो
ध्यायः॥४२॥ नारायण॰॥ गणेशवचनं श्रुत्वा सर्वदावेगतः सुधीः॥ परशुहस्तः परशुरामो निर्भ
श्री६ योगंतुमुद्यतः॥१॥ गणेश्वरस्तु तं दृष्ट्वा प्रभुमायपलतः॥ वारयामास तत्प्रीत्या चकार विनयेन पुनः॥२॥
रामस्तं प्रेरयामास हुंकृत्वा तु पुनः पुनः॥ बभूव च ततस्तत्र वाग्युद्धं हस्तकर्षणं॥३॥ परशुं निक्षेपणं
कर्तुं मनश्चक्रे भृगुसत्तमः॥ हाहाकारस्वाक्कार्ति वैयो बोधयामास संसदि॥४॥ अव्यर्थमस्त्रं हे भ्रात
गुरुदत्तं कुरु व्यर्थं क्षिप॥ गुरुस्त्वं बहुरु कुर्वं च मा भुवान्हंतुमर्हसि॥५॥ परशुं क्षेपयितुं स्त्रं दूरं तत्र पद्मदले क्ष
णं॥ गणेशं बोधयामास विर्वं तत्क्षिप्रस्वाचहं॥ पुनर्गणेशं रामश्च प्रेरयामास कोपतः॥ पपात दूरतो
यत्राच्छिन्नो मार्गो गजाननः॥६॥ गजाननः स्वयं प्रापपद्मं हत्वा तु साक्षिणं॥ पुनस्तं बोधयामास
जित॥ क्रोधः शिवात्मजः॥८॥ निवर्तस्व निवृत्तस्येत्युक्त्वा च पर्युपुनः पुनः॥ प्रवेशाने मे कुशात्रिरीश्व
रतां विना प्रभो॥९॥ मम भ्राता त्वमद्यपि विद्यासंबंधतो ध्रुवं॥ ईश्वरस्य प्रसादाच्च संलापं तेन हेतुना॥१०॥

नगाहं कार्त्तवीर्यश्च भूपालो हुतजं तवः ॥ अये विप्र न जानासि मां च विश्वेश्वरात्मजं ॥ ११ ॥ स्मणं
तिष्ठ निवर्त्तस्व स च येश्रीस्त्वणोतिथिः ॥ स्मणांतरे च यास्यांद्ध्यास्यामीश्वर संनिधिं ॥ १२ ॥ नारद॰ ॥
हेरंबवचनं श्रुत्वा प्रजहास पुनः पुनः ॥ पर्शुं क्षिपंतु येनाश्च मे प्रणम्याहं करं हरिं ॥ १३ ॥ पर्शुं क्षिपंत
प्रयुक्तं पर्शुरामेण गजाननः ॥ दृष्ट्वा पुरुषं देवेशं धर्महत्यालुसाक्षिणं ॥ १४ ॥ चकार हस्तयोगेन
सतहाक्षोटिपेजनं ॥ योगींद्रस्तत्र संतिष्ठन्नामयित्वा पुनः पुनः ॥ १५ ॥ रातधावेष्टयामास ध्वा
पयित्वा तु तत्र वै ॥ उर्ध्वं पुत्रो व्यवेगेन हुंकारं गरुडो यथा ॥ १६ ॥ सप्तद्वीपांश्च शैलांश्च कांचना
ख्यं सप्तसागरान् ॥ दक्षिणे दर्शयामास सर्वं योगेन संस्थितं ॥ १७ ॥ हस्तपादघनापूर्त्तं जडसर्वगि
रिपितं ॥ पुनः स्वंभ्रामयामास दर्पितं दर्पनाशनः ॥ १८ ॥ भूर्लोकं च भुवर्लोकं स्वर्लोकं च सुरेश्वरं ॥
जनोलोकं महर्लोकं दर्शयामास लीलया ॥ १९ ॥ सत्यलोकं ब्रह्मलोकं ध्रुवलोकं ततः परं ॥ गोरी
लोकं शांभुलोकं दर्शयामास नारद ॥ २० ॥ दर्शयित्वा तु ब्रह्मांडं सप्तपोस्त सप्तसागरान् ॥ पुनरुत्तीरणं चै
क्षेसनकं सागरोदकं ॥ २१ ॥ तत्रतमर्पयामास गंभीरे सागरे हढे ॥ पुनरुत्सं ततरं तं तं पुनर्ग्राहलीला
या ॥ २२ ॥ पुनस्तत्र भ्रामयित्वा ब्रह्मांडाद्रूर्ध्वपुत्तमं ॥ वैकुंठं दर्शयामास सलक्ष्मीकं जनार्दनं [illegible] इति ॥ २३ ॥
ग्रे भ्रामयित्वा योगींद्रो योगमायया ॥ पुनः करस्थ पोतं न वद्ध्यामास लीलया ॥ २४ ॥ गोलोकं दर्शया

मासविरजांच नदीश्वरी । वंद्यावनं त्रातश्चंद्रांशैर्वेदं रासमंडलं ॥ २५ ॥ गोगोपगोपिकाभिः क्षौद्रश्री हरंकं
रूपामसुंदरं । द्विभुजं मुरलीहस्तं सस्मितं सुमनोहरं ॥ २६ ॥ रत्नसिंहासनस्थं च रत्नभूषणभूषि
तं ॥ तेजसा कोटिसूर्याभं राधावक्षःस्थलस्थितं ॥ २७ ॥ एवं हरिं दृष्ट्वा पित्वा प्रणम्य च पुनः पुनः
क्षणेन च विमानस्थो धाम पित्वा पुनः पुनः ॥ २८ ॥ दृष्ट्वा हरिमिदं देवं सर्वपापप्रणाशनं ॥ ब्रह्म
हत्यादिकं पापं भस्मीभूतं बभूव ह ॥ २९ ॥ न भवेद्यातनानि स्याद्विना भोगेन पापजा ॥ स्वच्छां च कुभुजे
य मेगता स्पृहस्त दर्शिनोत्र ॥ ३० ॥ क्षणेन चेतनां प्राप्य पपात वेगतो भुवि ॥ बभव हरी भक्तं च गणेशा
स्तं भने भक्तोः ॥ ३१ ॥ सस्मार कवचं स्तोत्रं गुरुदत्तं सुदुर्लभं ॥ अमृतीए देवं श्रीहरिं गुरुं तं प्रभुं जगद्गुरुं ॥ ३२ ॥
शिवे पपर्शु मध्यर्प शिवलोकं च तेजसा ॥ शीघ्रं मध्याह्नमार्तंड प्रभाशतगुणं भुजे ॥ दृष्ट्वा शिवं
रोष्यपर्णे परस्थं च यहभ्रान्तं अपतिः स्थितं ॥ [illegible] ॥ ३४ ॥ शिवप्र
णामहस्तं च महादेववरेण च ॥ हाहेति शब्दमाकाशे देवाश्च कुर्महाभिया ॥ ३५ ॥ वीरभद्रः कार्तिकेयश्चै
त्रपाला अथपार्षदाः ॥ पपात भूमौ हस्तादसु सरक्तः शाबकुब्धरन्तः ॥ ३६ ॥ यथा गैरिकमुक्तश्च महास्फटिकपु
र्वतः ॥ शब्देन सा महादेवी चकंपे च पृवी भिया ॥ ३७ ॥ कैलासस्थजनाः सर्वे मूर्छामापुः क्षणं भिया ॥ नि
शावर्ता जगन्निद्रा याति शिरास्य जगत्प्रभोः ॥ ३८ ॥ आजगाम बहिः शं शार्वे सा सहसंभ्रमात् ॥ उमादृ

पुनः धेमेन क्षिप्यादं तं स

ग।ग०॥
ग८४॥

त्रीहिरंबंलोहिताख्यंक्षतंनतं ॥३९॥ भग्नदंतंजितक्रोधंसस्मितंलज्जितंप्रभुं ॥ पप्रच्छपार्वतीशीघ्रं
स्कंदंकिमितिपुत्रक ॥४०॥ सचतांकथयामासवार्त्तांपौर्वीपुरंभिदा ॥ चुकोपदुर्गाहरपयारुरो
ष्यमुहुर्मुहुः ॥४१॥ उवाससांभोःपुरतःपुत्रंहृत्वास्वक्षसि ॥ संबोध्यमानंकृष्णेनप्रियाविनयपूर्व
कं ॥४२॥ उवाचप्रीतासाध्वीचप्रणतासिहिदंपतिं ॥ कैलासवासिनःसर्वेरोकंहृत्वामुहुर्मुहुः ॥४३॥
॥२२५६॥ इतिश्रीब्रह्मवैवर्त्तेम०नारायणना०गणेशखंडेगणेशदंतभंगोनामत्रिचत्वारिंशोध्यायः ॥४३॥
पार्वत्यु० ॥ सर्वेजानंतिजगत्तिदुर्गांशंकरकिंकरी ॥ अपेक्षारहितादासीतस्याश्चजीवनेवृथा ॥१॥
ईश्वरस्यसमाःसर्वास्तृणपर्वतजातयः ॥ दासीपुत्रस्यशिष्यस्यकस्यदोषदूतिप्रभो ॥२॥ विश्वासं
कर्तुमुचितंचेच्चधर्मविदांवरः ॥ वीरभद्रःकार्त्तिकेयोपार्षदाःसंतिसाक्षिणः ॥३॥ साक्षीमिथ्यांन
वदेद्द्वावेषांभ्रातरौसमौ ॥ साक्षीसमोवात्वन्मित्रोसत्योधर्मनिरूपणे ॥४॥ साक्षीसभायांपक्षेसाक्षंच
मौनोप्यस्यपापभवेत्तः ॥ कामतःक्रोधतोवापिलोभेनचभयेनच ॥५॥ सयातिकुंभीपाकेचनिपात्य
शतपूरुषं ॥ तैश्चसार्द्धंवसेत्तत्रयावच्चंद्रदिवाकरौ ॥६॥ अहंविबोधितुंशक्तानिर्नेत्रीचद्वयोरपि ॥
तथापितवसाक्षात्तुमयाज्ञानिंदिताश्रुतौ ॥७॥ किंकराणांप्रभाकुर्वन्त्येवसतिसंसहि ॥ उद्दिते
भास्करेपद्ध्यांस्वघातश्चयथाप्रभो ॥८॥ सुचिरंतपसात[illegible]त्यरींपंचरणांबुजे ॥ परिसेवागभ
र्थं

ग८४॥
॥खं०॥

द्वा५

५+ महादानानि पुण्यानि भ्रतान्यनशनानि च ॥ तपांसि पतिसेवायाः कलां नार्हंति षोडशीं ॥ ५पं ॥ +५
येनैव संततं भीतया मया ॥ ९ ॥ पतिं विच्छेद मोहाभ्यामुक्तं योहेन तत्सरं ॥ तद्दह्ममस्य जन्मना अथ पुत्रस्ये
ताश्च हारणात् ॥ १० ॥ यपाय द्विपविस्वल्पत हाउत्रेश्चातेन किं ॥ साध्व्याः सदृशा जाताया ॥ श्रा तउत्राधिकः प
तिः ॥ ११ ॥ असदृशा प्रसूता या दुःखी अज्ञानेन वञ्चिता ॥ स्याविनं पश्यते नासौ पुत्रदोषेण दुःखिता ॥ १२ ॥ कुलि
नं पतितं मन्दं दरिद्रं रोगिणं जडं ॥ कुलजा विकुरूपं तं कांतं पश्यति संततं ॥ १३ ॥ हुताशनो वा सूर्यो वा सर्व
तेजस्विनां परः ॥ पतिव्रतातेजसश्च कलां नार्हंति षोडशीं ॥ १४ ॥ पुत्रो नापि पिता नापि बांधवो वा स
९ ता होदरः ॥ यो पितुं कुलजानां न कश्चित्स्वामिना समः ॥ १५ ॥ इत्येवमुक्त्वा स्वामिनं दुर्गतिहद्भ्रपुरतो पिउं ॥
सां भोः पाहि जगौ से वं तं स्निः श्वांकं तमुवाच ह ॥ १६ ॥ पार्वत्युवाच ॥ अपि राम महाभाग ब्रह्मवंशोसि पंडित ॥
पुत्रोसि जमदग्नेश्च शिष्योसि योगिनां गुरोः ॥ १७ ॥ माता ते रेणुका साध्वी पद्मांशा सत्कुलोद्भवा ॥ माता
महो वैष्णवश्च मातुलश्च ततोधिकः ॥ १८ ॥ संचरेणुकस्य पस्यमनुवंशोद्भवस्य च ॥ तौ हि त्रौ मातुलः साधु
रतो विष्णुर्यथा नृपः ॥ १९ ॥ कस्य दोषेण दुर्धर्षं स्वं न जानेदृ मोसुतो ॥ पे पांहाषे जनो दुरस्तवलेशुद्र पान
सा ॥ २० ॥ अमोघं प्राप्य परशुं गुरोश्च करुणानिधेः ॥ पदि क्षां क्षात्रियेहत्या बभूवतत्सुते पुनः ॥ २१ ॥ गुरवे
द क्षिणा दातु पुच्छितं च शस्त्रौ गुतं ॥ भग्नो दंतोतं त्वलुतस्य घेदवस्य स्यमस्तकं ॥ २२ ॥ गणेश्वरं रणे जित्वा शिष्य
स्त्रश्चेशव पोः पुनः ॥ आत्मानं चाश्विदोषं चापराजितो भृगुरात्रये ॥ २३ ॥ परशुनामोघवीर्येण शंकर

॥ग॰॥
॥८६॥

स्ववरेण च ॥ हंतुं चागतः गावश्च सिंहरूपी मायया प्रभुः ॥२४॥ यदि धर्मवशः को ऽपि हंतुं शक्तो गणे
श्वरः ॥ जितेंद्रियाणां प्रवरो न हि हंति च मक्षिकां ॥२५॥ तेन सार्द्धं तु युध्यंश्च दृष्ट्वा छायाश्च गणेश्वरः ॥
दिवाश्चान्ये हरं कृत्वा पूज्यास्तुश्चये इतस्ततः ॥२६॥ प्रीतः प्रभावतः प्राप्तः शंकरस्य वरेण च ॥ शोकेना
तिकठोरेण सर्वसंपद्विवर्द्धिना ॥२७॥ इत्युक्ता सा पार्वती रोषात्संस्मार मनसा सुव्रता ॥ रामः सस्मार तं हरं शु
भ्रवर्णं प्रचारसां गुरुं ॥२८॥ एतस्मिन्नंतरे दुर्गा प्रणम्य पुरतो ऽद्भुतं ॥ अतीव वामनं बालं सर्वकोटिसमप्र
भं ॥२९॥ शुक्लदंतं शुक्लवस्त्रं शुक्लयज्ञोपवीतिनं ॥ इंदुनेत्रं त्रिणेत्रं चैव विधृतं तिलकोज्वलं ॥३०॥ हृधरं
तुलसीमालां सस्मितं सुमनोहरं ॥ रत्नकेयूरवलयं रत्नमालाविभूषितं ॥३१॥ रत्नेन्द्रसारपादं च स
रत्नमुकुटोज्वलं ॥ रत्नकुंडलयुग्मेन गंडस्थलविराजितं ॥३२॥ स्थिरसुधांशुहरीयं तं भक्ताभयप्रदेन
च ॥ दक्षिणाभयमुद्रा च भक्तेशं भक्तवत्सलं ॥३४॥ बालिकाबालकगणैर्नानारैः सस्मितैर्वृतं ॥ केवा
सनाशिभिः सर्वैर्वृद्धैश्च वीक्षितं मुदा ॥३५॥ तं दृष्ट्वा संभ्रमाद्भूपः सस्तुत्य सहपुत्रकः ॥ प्रधर्षितप्या
प्रणनाम दुर्गां च दंडवद्भुवि ॥३६॥ आशिषं प्रददौ बालं सर्वेभ्यो वांछितः प्रदः ॥ तं दृष्ट्वा बालकः सर्वे पश्च
श्चर्यपशुभिर्या ॥३७॥ ध्यात्वा तस्मै शिवो भक्त्या चोपचाराणि षोडश ॥ प्रतोषं च स्मारश्रुस्सस्तौ परिपूर्ण
तमस्त्वच ॥३८॥ तु सा च कौण्वस्वारवोत्तं सोऽग्रेण नतकंधरः ॥ शुक्लांकितसर्वांगो भावितं सनातनं ॥३९॥

॥८६॥
॥गं॰॥

तुद्दो ५

रत्नसिंहासनसंस्थमुवाच शंकरः स्वयं ॥ अतीवतेजसा सर्वं प्रियत्नाहृतमेव च ॥४०॥ शंकर ॥
आत्मारामेषु कश्चात्रभ्रष्टोतीवविडंबनं ॥ तेरांश्च कुरालाधाराः कुशलाविद्धपजकाः ॥४१॥ अयमेस
कुलं जन्मजीवितं च सुजीवितं ॥ प्रासस्य पतिभिर्भ्रंस्य हस्तक्षौवापक्वौ ह पात्र ॥४२॥ पद्मिरणलिमः
हस्तोभोक्तृविस्तारहेतवे ॥ कव पातुण्य क्षेत्रे च भारते च हपानिधिः ॥४३॥ अतिथिःपूजितो
येन पूजिताः सर्वदेवताः ॥ अतिथिर्यस्य संतुष्टस्तस्यैव हरिः स्वयं ॥४४॥ स्नानेन सर्वतीर्थानां सर्व
दानेन यत्फलं ॥ सर्वव्रतोपवासाभ्यां सर्वयज्ञेषु दीक्षिता ॥४५॥ सर्वैस्तपोभिर्विविधैर्नित्यं नैमि
त्तिकादिभिः ॥ तेदेवातिथिसेवायाः कलां नार्हंति षोडशीं ॥४६॥ सोतिथिर्यस्य भग्नाशो याति
रुष्टश्च मंदिरात् ॥ कोटिजन्मार्जितं पुण्यं तस्य नश्यति निश्चितं ॥४७॥ स्त्रीगोघ्नश्च कृतघ्नश्च ब्रह्म
घ्नो गुरुतल्पगः ॥ पितृमातृगुरूणां च निंदको नरघातकः ॥४८॥ ब्रह्मस्वस्थापहारी च मिथ्यासा
क्षीप्रदायकः ॥ मित्रद्रोही कृतघ्नश्च वृषवाहश्च स्वपहृत ॥४९॥ शवदाही ग्रामयाजी ब्राह्मणो वृष
लीपतिः ॥ शूद्रश्राद्धान्नभोजी च शूद्रश्राद्धेषु भोजकः ॥५०॥ कन्याविक्रयकारी च श्रीहरेर्नामविक्र
रस२ यी ॥ लाक्षामांसरसोहैतिभानोलवणस्य च ॥५१॥ विक्रेता ब्राह्मणश्चैव तुरगाणां गवां तथा ॥ लाक्षा
हस्ती हस्तक्षसेवाहीनो विप्रश्च भारते ॥५२॥ एते महापातकिनो हि लोकेषु निंदिताः ॥ कालेसस्त्रैव

५४ संध्याहीनोन्यचाती चसत्सघ्नोहरिनिंदकः ॥

॥ गु॰ ॥
॥ ८६ ॥

नरके पतंति ब्राह्मणः शतं ॥५३॥ रातिभ्यो प्यधपः सोपिपस्यातिथिपराङ्मुखः ॥ नारद उ॰ ॥ शंक-
रस्य वचः श्रुत्वा सन्मुखः श्रीहरिः स्वयं ॥५४॥ मेघगंभीरया वाचा तमुवाच जगत्पतिः ॥ श्री विष्णु॰ ॥
श्वेतद्वीपागतो सोहं ज्ञात्वा कौतूहलं वचः ॥५५॥ परशुरामस्य रक्षार्थं हरिणा भक्तस्य संप्रतं ॥ न ते पं
विष्णुभक्ता नो मस्य भं विपते क्वचित् ॥५६॥ रक्षाम्यतश्च कहस्तो गुरुर्मन्त्रे विना शिवं ॥ नाहं पाता
गुरोरक्षे बलवन्मुरुहलनं ॥५७॥ तस्मात्पातकी नास्ति सेवाहीनो गुरोश्च यः ॥ मान्यः पूज्यश्च सर्वे-
भ्यो सर्वे पालनं को भवेत् ॥५८॥ अहो यस्य प्रसादेन सर्वान्पश्यति मानवः ॥ जनको जन्मदाता च
रक्षणाच्च पिता स्मृतः ॥५९॥ ततो विस्तीर्णकरणात्कलेल पास प्रजापतिः ॥ पितुः शतगुणे माता पो-
षणाद्गर्भधारणात् ॥६०॥ वंद्या पूज्या च मान्या च प्रसूरूपा वसुंधरा ॥ आहुः शतगुणो वंद्यः पूज्य-
मान्यो च दृष्टायकः ॥६१॥ यद्भूतानलं भरो देहो विष्णुश्च कल्पान्तरः ॥ अन्नदातुः शतगुणो भीष्टदेवः
स्मृतस्ततः ॥६२॥ गुरुस्तस्माच्छतगुणो विद्यामंत्रप्रदायकः ॥ अज्ञानतिमिरांधस्य ज्ञानदीपेन
चक्षुषा ॥६३॥ यः सर्वार्थं दृष्टि प्रतिलसरः कोपि बांधवः ॥ गुरुस्तेन मंत्रेण तपसेष्टसुरं लभे-
त् ॥६४॥ सर्वज्ञत्वं सर्वसिद्धिस्तत्परः कोपि बांधवः ॥ सर्वं जयंति सर्वत्र विद्यया गुरुदत्तया ॥६५॥
यस्मात्सत्यो हि जगति को वा बंधुस्ततोधिकः ॥ विद्यांधो वा धनांधो वा यो मूढो न भजेद्गुरुं ॥६६॥

॥ ८६ ॥
॥ खंडे ॥

ब्रह्महत्यादिभिः पापैः स लिप्तो नात्र संशयः ॥ दुष्टं प्रति तं हुंकृत्य नरस्तु ध्याचयेद्गुरुं ॥६७॥ सोऽप्यस्थि-
स्तीर्थस्नातोपि नाधिकारी च कर्मसु ॥ पितरं मातरं भार्यां गुरुपत्नीं गुरुं परं ॥६८॥ योन कुर्यात्तिको-
पद्यात्सहसा पातकी शिव ॥ गुरुर्ब्रह्मा गुरुर्विष्णु गुरुर्देवो महेश्वरः ॥६९॥ गुरुरेव परं ब्रह्म गुरुर्
भास्कररूपकः ॥ गुरुश्चंद्रस्तथा देवः श्रीगुरुश्च वरुणोनलः ॥७०॥ सर्वरूपो हि भगवान्परमात्मा स्व-
यं गुरुः ॥ नास्ति वेदात्परं शास्त्रं नहि सूक्ष्मात्परः गुरुः ॥७१॥ नास्ति गंगासमं तीर्थं न कृष्णात्तु तुलसी प-
रं ॥ क्षमावतीर्थं नेपरोऽस्त्येका नास्ति परः प्रियः ॥७२॥ परं स्वपुण्यसक्तानां च पुण्यं वंदनं नेप पा ॥
पोक्षहानां पयः कारी वैष्णवानां यथा शिवः ॥७४॥ न पार्वतीपरा साध्वी न गणेशात्सरोऽक्षरी ॥ न
च विद्यासमो बंधुर्नास्ति कश्चिद्गुरोः परः ॥७५॥ विद्यादातुः कुत्र परो तत्समो नात्र संशयः ॥ गुरुर्विद्या-
यां च पुत्रे च बभ्रव रामहेतने ॥७६॥ परं संपार्जनं कर्तुमागतोहं तवालये ॥ नारायण ॥ रसेव मुत्सारं
पुंच दुर्गासिंबोध्य नारद ॥७७॥ उवाच भगवांस्तत्र सत्यं सारं प्रियं वचः ॥ श्रीविष्णु ॥ शृणु हे विप्रव-
र्यादिमद्दीयं वचनं शुभं ॥७८॥ हितं नीतं वेदसारं परिणामसुखावहं ॥ यथा ते बाजवक्लेश्यकाशि-
के च पार्वती ॥७९॥ रामस्तथा ते पुत्रो विना स्नेह न ता सति ॥ नास्ति स्नेह भेदश्च तव रामांबर

६ + नैव देवात्परः स्त्रीणामद्भुतं नैकाहृत्स्त्रीविना ॥ क्षमा
व मा पापहरं पंजेन क्षेत्रं भारतालरं ॥७३॥ ६

गु ४७

॥ग०॥
॥१८७॥

स्यच ॥ ८० ॥ विचार्य स सर्वं सिवं स्तिकुरूयां तर्पयोन्वितं ॥ पुत्रेण सार्द्धं पुत्रस्य विवाहेनैव दोषदः ॥ ८१ ॥
देवं हेतुं कोपितस्ततो देवं च बलवत्तरं ॥ उमाभिमतवं वै हेतु परस्य वत्सवरानने ॥ ८२ ॥ रामदंतदृतिस्वा
तं सर्वं हि वनपस्कृतं ॥ पुत्राणामष्टकं स्तोत्रं सामवेदोक्तमुत्तमं ॥ ८३ ॥ शृणुष्वावहितं मातः सर्ववि
घ्नहरं परं ॥ श्रीविष्णुः ॥ गणेशमेकदंतं च हेरंबं विघ्ननायकं ॥ ८४ ॥ लंबोदरं शूर्पकर्णं गजवक्त्रं गु
हाग्रजं ॥ नामाष्टकार्थं पुत्रस्य शृणु मातर्हरप्रिये ॥ ८५ ॥ स्तोत्राणां सारभूतं तत्सर्वविघ्नहरं परं ॥
ज्ञानार्थवाचको गश्च णश्च निर्वाणवाचकः ॥ ८६ ॥ तयोरीशं परं ब्रह्म गणेशं प्रणमाम्यहं ॥ ए
कशब्दः प्रधानार्थो दंतश्च बलवाचकः ॥ ८७ ॥ बलं प्रधानं सर्वस्मादेकदंतं नमाम्यहं ॥ दीना
र्थवाचको हेश्च रंबः पालनवाचकः ॥ ८८ ॥ परिपालकं दीनानां हेरंबं प्रणमाम्यहं ॥ विपत्तिवा
चको विघ्नो नायकः खंडनार्थकः ॥ ८९ ॥ विपत्खंडनकारं च नमामि विघ्ननायकं ॥ विष्णुदत्तैश्च नै
वेद्यैर्यस्य लंबोदरं पुरा ॥ ९० ॥ पित्रा दत्तैश्च नैवेद्यैर्वंदे लंबोदरं च तं ॥ शूर्पकारौ च यत्कर्णौ विघ्न
वारणकारणौ ॥ ९१ ॥ संपदां ज्ञानरूपौ च शूर्पकर्णं नमाम्यहं ॥ विष्णुप्रसादपुष्पं च यन्मूर्ध्नि मुनिद
त्तकं ॥ ९२ ॥ तद्गजेंद्रवक्त्रयुक्तं गजवक्त्रं नमाम्यहं ॥ गुहस्याग्रे च जातोयमाविर्भूतो हरेर्गृहे ॥ ९३ ॥ वंदे गु
हाग्रजं देवं सुरसिद्धप्रपूजकं ॥ एतन्नामाष्टकं दुर्गे नामार्थसंयुतं परं ॥ ९४ ॥ पुत्रस्य पश्य वेदे च तदा कोपं

॥१८७॥
॥खं०॥

कुरुष्व त्वं यथा ॥ ततस्त्वापा एवं देवी नामार्थसिद्धं तं पुरा ॥ १५ ॥ त्रिसंध्यं यः पठेन्नित्यं स सुखी सर्वतो जयी ॥
ततो विघ्नाः पलायंते वैनतेयाद्यथोरगाः ॥ १६ ॥ गणेश्वरप्रसादेन महाज्ञानी भवेद्ध्रुवं ॥ पुत्रार्थी ल
भते पुत्रं धनार्थी लभते धनं ॥ १७ ॥ महाजडः कवींद्रश्च विद्यावांश्च भवेद्ध्रुवं ॥ इत्युक्तं नारद स्वल्पमि
गणेशस्य चरित्रकं ॥ १८ ॥ २३ ॥ ॥ इति श्रीब्रह्मवैवर्ते म० नारायणना० गणपतिखंडे चतुश्चत्वा
रिंशोध्यायः ॥ ४४ ॥ नाराय० ॥ पार्वतीं बोधयित्वा तु विष्णू राममुवाच ह ॥ हितं सत्यं नीतिसारं परि
णामसुखावहं ॥ १ ॥ श्रीविष्णु० ॥ राम त्वमधुनास्य समपराधी न चेद्भक्तिः ॥ कोपात्त्वया दंतभग्नं गणेश
स्य स्थितो भवत् ॥ २ ॥ मयोक्तेनैव स्तोत्रेण स्तुत्वा गणपतिं परं ॥ काण्वशाखोक्तस्तोत्रेण स्तौति दुर्गां
जगत्प्रसूं ॥ ३ ॥ श्रीहरेरस्य पराशक्तिर्बुद्धिरूपा जगत्प्रसूः ॥ तस्याश्च तनुरूपायां हतबुद्धिर्भविष्यसि ॥ ४ ॥
सर्वेशोसि स्वरूपेयमनया शक्तिमज्जगत् ॥ अनया शक्तिमान्हसोपि निर्गुणः प्रकृतेः परः ॥ ५ ॥ सृष्टिं क
र्तुं न शक्तश्च हरस्त्वशक्तस्त्वनया विना ॥ वयमस्याः प्रसादाश्च ब्रह्मविष्णुमहेश्वराः ॥ ६ ॥ सुरसंघे सुर
ग्रस्ते काले घोरसमरे द्विज ॥ तेजःसु सर्वदेवानामाविर्भूता पुरा सती ॥ ७ ॥ दत्त्वा तया सुरान्हत्वा तेभ्यः प
रं पदं ददौ ॥ दक्षपत्न्यां तु जन्म लेभे दक्षस्य तपसा पुरा ॥ ८ ॥ भार्यापि भूत्वा शंकरस्य पुनः पत्युश्च निंदया ॥
देहं संत्यज्य शैलपत्न्यां जन्म लेभे पुनः सती ॥ ९ ॥ शंकरस्तपसा लब्धो योगींद्राणां गुरोर्गुरुः ॥ लब्धो

॥ग्०॥
॥१८८॥

गणपतिः पुत्रो कृष्णांशो हरस्तु सेवया ॥१०॥ यमेवं ध्यायते नित्यं तं जानासि न बालकं ॥ स तव भगवा
न् कृष्णः स्वांशेन पार्वतीसुतः ॥११॥ पूजां जगृह ततः कृत्वा स्तोत्रं हि दुर्गमिश्रिव प्रियां गत्वा वां श्रिवे प्रहृष्टदेवी
श्रिववीं आश्रिवेश्वरी ॥१२॥ श्रिवायाः स्तोत्रराजेन हस्तेन श्लोकिनापुरा ॥ त्रिपुरस्य वधे घोरे ब्रह्मणा
प्रेरितेन च ॥१३॥ इत्युक्त्वा श्रीपतिः श्रीप्रेजगाम श्रीनिकेतनं ॥ गते हरौ हरिं स्मृत्या सामसां स्तोतुमुद्य
तः ॥१४॥ विशुद्दत्तेन स्तोत्रेण सर्वविघ्नहरेण च ॥ धर्मार्थकाममोक्षाणां कारणेनेच्यनारद ॥१५॥ पु
टांजलिपुतो भक्त्या स्नात्वा गंगोदके शुभे ॥ गुरुं प्रणम्य भक्तेश्वरं ध्यात्वा धौते च वाससी ॥ आचम्य
मध्यनित्यां तां भक्तिनम्रो समकंधरः ॥ पुलकांकितसर्वांगस्त्वानंदाश्रुसमन्वितः ॥१६॥ श्रीपरशु
श्रीकृष्णस्य च गोलोके परिपूर्णतमस्य च ॥ आविर्भूता विग्रहतः पुरा सृष्ट्युन्मुखस्य च ॥१८॥ सूर्य
कोटिप्रभाजुष्टा रत्नालंकारभूषिता ॥ वह्निशुद्धांशुकाधाना सस्मिता सुमनोहरा ॥१९॥ नवयौव
नसंपन्ना सिंदूरबिंदुशोभिता ॥ ललिता कबरीभारमालतीमाल्यमंडिता ॥२०॥ अहोनिर्वचनीया पा
तां नानाम स्तौति विभक्तितो ॥ मोक्षप्रदां मुमुक्षूणां महाविष्णोर्विधिः स्वयं ॥२१॥ मुमोह क्षणमात्रेण
दृष्ट्वा यां सर्वमोहिनीं ॥ रासे संभूय सहसा सस्मिता राधिता पुरा ॥२२॥ सद्भिः ख्याता तेन रा
धा कृत्वा प्रकृतिरीश्वरी ॥ कृष्णस्तां सह सोंहायवीर्याधानं चकार ह ॥२३॥ ततो डिंबं महज्जज्ञे

॥१८८॥
[illegible]

४ × तेजोधिष्ठात्रिया मूर्तिर्वेदिन्यास्य प्रसूरपि ॥ तां सावित्रीं शुद्धरूपां प्रवदंति मनीषिणः ॥ ×४

पतो भक्तो महान्विराट् ॥ यस्यैव रोमकूपेषु ब्रह्मांडान्यखिलानि च ॥२४॥ तदंशं गारंभ्य येनैव तन्निश्वासो व
भूव ह ॥ स निश्वासो महावायुः स विराट् विश्वधारकः ॥२५॥ तव घर्मजलेनैव प्लावयं विश्वगोलकं ॥ स
विराट् विश्वनिलयो जलराशौर्बभूव ह ॥२६॥ ततस्सं पंचधाभूय पंचमूर्तिश्च बिभ्रती ॥ प्राणाधिष्ठा
त्रिया मूर्तिः कृष्णस्य परमात्मनः ॥२७॥ कृष्णप्राणाधिकां राधां प्रवदंति मनीषिणः ॥ ऐश्वर्याधिष्ठा
त्रिया मूर्तिः संपत्तिस्वरूपिणी ॥२८॥ लक्ष्मीं वदंति संतस्तां शुद्धसत्वस्वरूपिणी ॥ वागाधिष्ठा
त्रिया देवी शुक्लमूर्तिः सतां प्रसूः ॥२९॥ सरस्वतीं तां शास्त्रज्ञां शास्त्रज्ञाः प्रवदंत्यहो ॥ बुद्धिविद्यास
र्वशक्तिर्या मूर्तिरधिदेवता ॥३०॥ सर्वमंगलमंगल्यां संतो वदंति सर्वमंगलां ॥ सर्वमंगलमांगल्या सर्वमंग
लरूपिणी ॥३१॥ सर्वमंगलबीजस्य शिवस्य मंदिरे धुना ॥ शिवे शिवास्वरूपा त्वं लक्ष्मीर्नारायणांतिके ॥३२॥
सरस्वती च सावित्री वेदसूः ब्रह्मणः प्रिया ॥ राधा रासेश्वरस्यैव परिपूर्णतमस्य च ॥३३॥ परमानं
रां दरूपस्य परमानंदरूपिणी ॥ त्वत्कलांशांशकलया देवानामपि योषितः ॥३४॥ त्वं विद्या योषितः सर्वास्त्वं स
र्वबीजरूपिणी ॥ छाया चंद्रस्य सूर्यस्य रोहिणी सर्वमोहिनी ॥३५॥ शची शक्रस्य कामस्य कामिनी रति
रीश्वरी ॥ वरुणानी जलेशस्य वायोः स्त्री प्राणवल्लभा ॥३६॥ वन्हेः प्रिया च स्वाहा त्वं कुबेरस्य च सुंदरी ॥
यमस्य च सुशीला च नैर्ऋतस्य च कैटभी ॥३७॥ ईशानस्य शशिकला शतरूपा मनोः प्रिया ॥ देवहूती कर्दम

स्वच्छस्फाटिकस्फाप्यंरूधती ॥३८॥ अदितिर्देवमाता या पुत्रगणप्रसुने:त्रिका ॥ अहिर्व्यापीतमस्यापीसनी
धारा वसुंधरा ॥३९॥ गंगा च तुलसी चापि पंथा व्योमः सरिद्वरा ॥ एताः सर्वाश्च या [illegible]म्याः सर्वास्तत्
कपी विकृती ॥४०॥ गृहे लक्ष्मीश्च पात्रणां दारा स्थलक्ष्मीश्च राजसु ॥ तपस्विनां तपस्या च गायत्री ब्राह्म
णस्य च ॥४१॥ सती सत्यस्वरूपा च पमसतांवृहहांकुरा ॥ ज्योतीरूपा निर्गुणस्य शक्तिस्त्वं सगुणस्य
च ॥४२॥ सूर्ये तेजःस्वरूपा त्वं दाहिका च हुताशने ॥ जले शैत्यस्वरूपा च शोभारूपा निशाकरे ॥४३॥
त्वं भूमौ गंधरूपा च आकाशे शब्दरूपिणी ॥ क्षुत्पिपासादयास्त्वं च जीविनां सर्वशक्तयः ॥४४॥ स
र्वबीजस्वरूपा त्वं संसारे साररूपिणी ॥ स्मृतिर्मेधा च बुद्धिश्च ज्ञानशक्तिर्विपश्चितां ॥४५॥ हरेहि
न विद्या या दत्ता सर्वज्ञानप्रसूः शुभा ॥ शूलिने कृपया सा त्वं यतो मृत्युंजयः शिवः ॥४६॥ सृष्टि
पालनसंहारशक्तयस्त्रिविधाश्च याः ॥ ब्रह्मविष्णुमहेशानां सा त्वमेव नमोऽस्तु ते ॥४७॥ मधुकैटभभी
त्या च त्रस्तो धाता प्रकंपितः ॥ स्तुत्वा मुमोच यां देवीं तां मूर्ध्ना प्रणमाम्यहं ॥४८॥ मधुकैटभयोर्युद्धे त्राता
सौ विष्णुरीश्वरी ॥ बभूव शक्तिमान्स्तुत्वा तां दुर्गां तां नमाम्यहं ॥४९॥ त्रिपुरस्य महायुद्धे सरथे पतिते शि
वे ॥ यां तुष्टुवुः सुराः सर्वे तां दुर्गां प्रणमाम्यहं ॥५०॥ विष्णुना वृषरूपेण स्वयं शंभुः समुत्थितः ॥ जघा
न त्रिपुरं स्तुत्वा तां दुर्गां तां नमाम्यहं ॥५१॥ यदाज्ञया वाति वातः सूर्यस्तपति संततं ॥ वर्षतींद्रो दहत्य

ग्विसत्तां दुर्गां प्रणमाम्यहं ॥५२॥ यदाज्ञपा च म्राभ्रस्थ ख्रिवलुत्व्य पराक्रमः ॥ मत्स्पर्ध्वरतिजं येच्य तां दुर्गां
प्रणमाम्यहं ॥५३॥ स्रष्टा सृजति सृष्टिं च पाता पाति यदाज्ञया ॥ संहर्त्ता संहरेत्काले तां दुर्गां प्रणमाम्यहं ॥५४॥
ज्योतिःस्वरूपो भगवान् श्रीकृष्णो निर्गुणः स्वयं ॥ यया विना न शक्तश्च सृष्टिं कर्तुं नमामि तां ॥५५॥ र
क्ष रक्ष जगन्मातरपराधान् क्षमस्व मे ॥ शिशूनामपराधेन कुतो माता हि कुप्यति ॥५६॥ इत्युक्त्वा प
र्शुरामश्च प्रणम्य तां रुरोद ह ॥ तुष्टा दुर्गा संभ्रमेण चाभयं च वरं ददौ ॥५७॥ अमरो भव हे वत्स सुपुत्र सु
स्थिरतां व्रज ॥ सर्वप्रसादात्सर्वत्र जयोस्तु तव संततं ॥५८॥ सर्वांतरात्मा भगवान् तुष्टोस्तु संततं हरिः ॥
भक्तिर्भवतु ते कृष्णे शिवदे च शिवे गुरौ ॥५९॥ इष्टदेवे गुरौ यस्य भक्तिर्भवति शाश्वती ॥ तं हंतुं न हि शक्ता
श्च रुष्टाश्च सर्वदेवताः ॥६०॥ श्रीकृष्णस्य च भक्तस्त्वं शिष्यश्चापि शंकरस्य च ॥ गुरुपत्नीभयात्सोहि कस्त्वां हं
तुमिहेश्वरः ॥६१॥ अहो न कृष्णभक्तानामशुभं विद्यते क्वचित् ॥ अन्यदेवेषु ये भक्ता न भक्ता वा निरंकु
शाः ॥६२॥ चंद्रमा बलवांस्तुष्टो येषां भाग्यवतां भृगो ॥ तेषां तारागणा रुष्टाः किं कुर्वंति च दुर्बलाः ॥६३॥ इ
त्युक्त्वा पार्वती तुष्टा दत्वा राम शुभाशिषं ॥ जगामांतःपुरे तूर्णं हरिशब्दो बभूव ह ॥६५॥ काण्वशाखोक्तं
स्तोत्रं पूजाकाले च यः पठेत् ॥ यात्राकाले च प्रातर्वा वांछितार्थं लभेद्ध्रुवं ॥६६॥ पुत्रार्थी लभते पुत्रं कन्यार्थी
कन्यकां लभेत् ॥ विद्यार्थी लभते विद्यां प्रजार्थी लभते प्रजां ॥६७॥ भ्रष्टराज्यो लभेद्राज्यं धनभ्रष्टो धनं
लभेत् ॥ यस्य रुष्टो गुरुर्देवो राजा वा बांधवोऽथवा ॥६८॥ तस्य तुष्टश्च वरदः स्तोत्रराजप्रसादतः ॥ दस्युग्रस्तो
५ + स्यस्तुष्टः सभायां च नरदेवो महान् सुखी ॥ तस्य किं वा करिष्यंति रुष्टा भृत्याश्च दुर्बलाः ॥६९॥ ×५

॥ग॥ना॥
॥१००॥

हिमस्तथ्य शत्रुग्रस्तो भयानकः ॥६९॥ व्याधिग्रस्तो भवेन्मुक्तः स्तोत्रस्मरणमात्रतः ॥ सत्तद्धारेस्म
शोके च कारागारस्थे च बंधने ॥७०॥ जले मग्नौतिमग्नश्च मुक्तो भवति स्तोत्रतः ॥ स्वामिभेदे पुत्रभेदे मि
दे२ त्रभेदे तिदारुणे ॥७१॥ स्तोत्रस्मरणमात्रेण वांछितार्थं लभेद्ध्रुवं ॥ सत्याह विप्र वर्षं च स्तोत्रराजं श्टणोति
वा ॥७२॥ भक्त्या दुर्गां च संपूज्य पहार्यं ध्यात्वा प्रसवते ॥ लभते सांनिध्ये पुत्रं ज्ञानिनं चिरजीविनं ॥७३॥
असौभाग्या च सौभाग्यं षण्मासश्रवणाल्लभेत् ॥ यदा मासं काकवंध्या मृतवत्सा च भक्तितः ॥७४॥
स्तोत्रराजं यान्श्टणोति सा पुत्रं लभते ध्रुवं ॥ कन्या माता पुत्रहीना पंच मासं श्टणोति वा ॥७५॥ घटे संपूज्य
दुर्गां च सा पुत्रं लभते ध्रुवं ॥ उपचारैः षोडशभिः पूजां कुर्याद्विशु भक्तितः ॥७६॥ श्टत्या गणपतेः स्वं
डं यो हेवा देवतालये ॥ श्रवणं कुरुतेन्नणां गणेशं लोकं प्राप्नुयात् ॥७७॥ एकविंशतिमा वर्णं भक्ति
युक्तः पठेन्नरः ॥ न भवेत्तु पुनर्मारश्च गणेशार्चनं कुरु ॥७८॥ मंगलौ सवकृत्तं वं वेदघोषस
मन्वितैः ॥ पंड पंटवाद्य कर्तव्यं त्रीचितं पटहस्तवदैः ॥७९॥ कंदलीस्तंभसंयुक्तं मामृतोरणसंयुतं ॥
या हरिद्दिनपर्पितं वा गलं कुरु नारद ॥८०॥ तत्पुजन्म कुरु मुने कथाकीर्तनसंयुतं ॥ प्रतिवर्षं च कुरु
॥८१॥ ते स नरो मोक्षमाप्नुयात् ॥ त्रयोदश्यादिदिने प्राप्ते गंगातीरे विशेषतः ॥ वापीतटागे वा हस्त्यावि स
जैन मुने ः कुरु ॥८२॥ ॥२७८॥ ॥ इति श्रीब्रह्मवैवर्ते म…नारायणनारदसंवादे गणपतिखंडे दुर्गास्तोत्र
नाम पंचचत्वारिंशोध्यायः ॥४५॥ नारायणः ॥ कृत्वा दुर्गां परशुरामो हर्षविह्वलमानसः ॥ हरिनोक्त ॥१००॥
॥खं०॥

नैवेद्येण तुलसा च गणेश्वरं ॥१॥ पूजांश्चकार भक्त्या च नैवेद्यैर्विविधैरपि ॥ धूपैर्दीपैश्च गंधैश्च पु
ष्पैश्च तुलसीं विना ॥२॥ स्कंदस्य भ्रातरं भक्त्या परशुरामः शंकराज्ञया ॥ गुरुपत्नीं गुरुं नत्वा गणमंत्रं कृत्तु
मुपत्त: ॥३॥ नारदः ॥ पूजां भगवतश्चक्रे रामो गणपतेर्यदा ॥ नैवेद्यैर्विविधैः पुष्पैस्तुलसीं च विना
कथं ॥४॥ तुलसी सर्वपुष्पाणां मान्या धन्या मनोहरा ॥ कथं परात्परा भक्ता तां न गृह्णाति गणेश्वरः ॥५॥
नारायणः ॥ शृणु नारद वक्ष्येऽहमितिहासं पुरातनं ॥ ब्रह्मकल्पस्य वृत्तांतं निगूढं च मनोहरं ॥६॥ एकदा
तुलसी देवी श्रोद्भिन्नयौवनान्विता ॥ तीर्थं भ्रमंती तपसा नारायणपरायणा ॥७॥ ददर्श गंगाती
अ रेच गणेशं यौवनान्वितं ॥ अतीव सुंदरं शुद्धं सस्मितं पीतवाससं ॥८॥ चंदनोक्षितसर्वांगं रत्नभूषण
भूषितं ॥ ध्यायंतं हृत्कृष्णपादाब्जं जन्ममृत्युजराहरं ॥९॥ जितेंद्रियाणां प्रवरं योगींद्राणां गुरोर्गुरुं ॥
अरूपं हास्यवीक्ष्यामास कामात्समुवाच ह ॥१०॥ तुलस्युवाच ॥ अयि किं ध्यायसे देव शांतरूप गजानन ॥
कथं लंबोदरं देहं गजवक्त्रं कथं तव ॥११॥ हस्तिदंतः कथं वक्त्रे वदामुपचकारणं ॥ त्यज ध्यानं महाभा
ग सायंकालमुपस्थितः ॥१२॥ इत्युक्त्वा तुलसी तत्र जहास च पुनः पुनः ॥ परांचेतसि दग्धा सा कामबा
णैः सुदारुणैः ॥१३॥ गणेशस्य प्रधानां दत्वा किंचिज्जलं पुनः ॥ सध्यानतर्जन्यग्रेण भिसंदष्टकामा

॥ग०॥
॥१७॥

॥५

नसे ॥१४॥ बाभ्रव ध्यानभंगश्च तस्य नारदस्य चेतसि ॥ दुःखं च ध्यानभंगेन संविक्षिप्तो हरो दृढः ॥१५॥
ध्यानं यत्याहरिंस्य साहद्दर्शी कामिनी पुरः ॥ नवयौवनसंपन्नां सस्मितां कामपीडितां ॥१६॥ ॐवै
हरस्यांतेदहुपरे विनयपरवक्रं ॥ उवाच सस्मितः शांतः शांतां कामातुरां वरां ॥१७॥ श्रीगणे० ॥ कांते
यसे कस्य कन्यासि मातर्मोक्षि हि किं शुभे ॥ पापदोषमदुःसाध्य ध्यानभंगस्तपस्विनां ॥१८॥ हरस्तः क्रूरो तु
कल्याणं हंतु विघ्नरूपा निधिः ॥ मैं मध्यानभंजो हियानदोषभवतु तेसुखं ॥१९॥ गणेशावचनं श्रु
त्वा तमुवाच स्मरातुरा ॥ सस्मितं सकटाक्षं च देवं मधुरया गिरा ॥२०॥ तुलस्युवाच ॥ धर्मध्वजस्य कन्या
हमपि प्रौढा च तपस्विनी ॥ तपस्यामस्यामिवोर्पत्ये स्यामिनवमिमप्रति ॥२१॥ तुलसीवचनं श्रुत्वा गणेशः
श्रीहरिं स्मरन् ॥ तामुवाच महाप्राज्ञः प्रौढां तां मधुरया गिरा ॥२२॥ श्रीगणे० ॥ हे मातर्नास्ति मे वा
ञ्छा घोरे ह्वारपरिग्रहे ॥ दारग्रहो हि दुःखाय न सुखाय कदाचन ॥२३॥ हरिभक्तिर्व्यपायश्च तपस्याना
शहेतुकः ॥ मोक्षद्वारकपाटं च भवबंधनपाशकः ॥२४॥ गर्भवाससमेतैः शास्वतत्त्वज्ञाननिकृंतनः ॥ सं
शयानां समारंभो दुःसाध्योपि वृषभैरपि ॥२५॥ गर्वाहंकारणानां च सर्वमायाकरंडकः ॥ साहसानां समूह
श्चहेयाणां च विशेषतः ॥२६॥ निवर्तस्व महाभागे पश्यान्यं कामुकं पतिं ॥ कामुकेनैव कामुक्याः सं
रः

॥९१॥
॥रुं०॥

णावाँगुणवान्भवेत्सा ॥२७॥ इत्येवं वचनं श्रुत्वा क्रोपसंतेतेराक्षापह ॥ तायस्तेभवविता साध्वीति
च गणेश्वरः ॥२८॥ इत्याकर्ण्य सुरश्रेष्ठस्तां शशाप शिवात्मजः ॥ देवित्वमसुराग्रस्ता भविष्य
सि न संशयः ॥२९॥ तमथ्या महतां शापाद्वृक्षत्वं भवितेतिच ॥ महातपस्वी सत्येवं विरराम गणे
श्वरः ॥३०॥ शापं श्रुत्वा तु तुलसी प्ररुरोद पुनः पुनः ॥ तुष्टाव च सुरश्रेष्ठः सा प्रसन्नमुवाच तां ॥
३१॥ श्रीगणेश ॥ पुष्पाणां सारभूता त्वं भविष्यसि मनोरमे ॥ कलांशेन महाभागे स्वयं नारायणप्रि
ये ॥३२॥ प्रियात्वं सर्वदेवानां श्रीकृष्णस्य विशेषतः ॥ विकुभतः विशेषेण तामपि क्षणमात्र
तः ॥३३॥ रुजाविमुक्तिदा नृणां मम मज्यो सोच सर्वदा ॥ इत्युक्त्वा तां सुरश्रेष्ठो जगाम तपसे पु
नः ॥३४॥ हरेराराधनेव्यग्रो बदरीसन्निधिं ययौ ॥ जगाम तुलसी देवी हृदयेन विदूयता ॥३५॥
निराहारा तेपश्चैव पुष्करे ह्रवत्सरं ॥ पश्चान्मुनीन्द्र शापेन गणेशस्य च नारद ॥३६॥ सा प्रिया
गीं शंखचूडस्य बभूव सुचिरं मुने ॥ ततः शंकरशूलेन तं जघान सुरेश्वरः ॥३८॥ सा कलांशेन
[illegible]वृक्षात्वे स्वयं नारायणप्रिया ॥ कथितश्चेतिहासस्ते श्रुतो धर्ममुख्यांकुरा ॥३९॥ योऽस्त्र
इश्वसारभुपुराणेन प्रकीर्तितिः ॥ परशुरामो महाभागो जगाम तपसे वन ॥४०॥ प्रणम्य हरिं

करेदुर्गसिंधरज्यच गणेश्वरं ॥ पूजितो वंदितः सर्वैः सुरैर्देवैर्मुनिपुंगवैः ॥४१॥ पार्वती शिवसं
निध्येतत्रैत स्तोत्रं गणेश्वरः ॥ इदं गणपतेः स्तवं यः शृणोति समाहितः ॥४२॥ स राजसस्यय
शस्यफलं प्राप्नोति निश्चितं ॥ अपुत्रो लभते पुत्रं श्रीगणेशप्रसादतः ॥४३॥ धीरं वीरंच गुणि
नं सुखिनं चिरजीविनं ॥ पराख्यिनं गुणिनंच विद्वांसं सुकवीश्वरं ॥४४॥ जितेंद्रियाणां प्रवरं सदा
तारं सर्वसंपदां ॥ सुपवित्रं सदाचारं परास्वं वै सुवं लभेत ॥४५॥ अधिकं सर्वं दयालुंच तत्वज्ञान
विशारदं ॥ भक्त्या यो गणेशस्य व स्तोत्रं कारभषितैः ॥४६॥ शृण्वंति स कथां ते वै भवंसे
र्जुनेपादपाः ॥ असंप्रणम्य शृण्वंतो विषवृक्षा भवंति ते ॥४७॥ तपाशयोमाः शृण्वंतो भवं
सजगरेनराः ॥ यः शृणोति कथां वक्तुः समौन संस्थिताः ॥४८॥ गुरुतल्पसमं पापं संप्राप्य
नरकं अजेत ॥ येपि दंति पुराणज्ञाः कथां पापापहारिणीं ॥४९॥ तेवैजन्मशतं मत्स्याभुनवपाः स्य
भवंतिहि ॥ कथायां वर्तमानायां वदंतीति दुरुत्तरं ॥५०॥ ते गर्धभाः प्रजायंते खरूलासस्त
तःपरं ॥ कदाचिद्दपि वेशुण्मा नशृण्वंति कथां नराः ॥५१॥ ते भ्रष्टा नरकान्घोरान् भवंति वन
शूकराः ॥ ये कथामनुमोदंते कीर्त्यमानां नरोत्तमाः ॥५२॥ अशृण्वंतोपि संयांति शाश्वतं पर

१ना

॥१९२॥
॥खं०॥

मंपदं ॥ कथायां कीर्त्यमानायां विघ्नं कुर्वंति ये शठाः ॥५३॥ कोट्यब्दं नरकान् भुक्त्वा भवंति ग्रामश्
कराः ॥ ये श्रावंति मनुष्याः पुण्यां पौराणिकीं कथां ॥५४॥ कल्पकोटिशतं साग्रं तिष्ठंति ब्रह्म
णः पदे ॥ आसनार्थं प्रयच्छंति पुराणज्ञस्य ये नराः ॥५५॥ कंबलाजिनवासांसि मंचकं फलमेव
च ॥ स्वर्गलोकं समासाद्य भुक्त्वा भोगान्यथेप्सितान् ॥५६॥ स्तोलीपमस्तकाये च कथां श्रृण्वंस्यपा
वनीं ॥ ते बलाकाः प्रजायंते पापिनो मनुजाधमाः ॥५७॥ तांबूलं भक्षयंतो ये कथां श्रृण्वंति पाव
नीं ॥ स्वविष्ठां खादयंत्येतान् नरके यमकिंकराः ॥५८॥ श्रृत्वास्या गणपतेः खंडं महावंध्या प्रसूयते ॥ मृ
२ तवत्सा काकवंध्या श्रुत्वा पुत्रं लभेद्ध्रुवं ॥५९॥ धान्यदूषिता दूषिता पापाच्च शुद्धं लभे[illegible]द्ध्रुवं ॥ गर्भस्रावं च ब्रह्म रा
वैवर्त्ते श्रुत्या यल्लभते फलं ॥६०॥ तत्फलं लभते मर्त्यः श्रुत्वेदं खंडमुत्तमं ॥ वांछां दत्त्वा तु मनसि
श्रृणोति परमास्तिकः ॥६१॥ तस्मै ददाति सर्वेष्टं सुरश्रेष्ठो गणेश्वरः ॥ यत्पुराणश्रवणं कुर्यात्ते वै
लंबोदरालयं ॥६२॥२५९६॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे नारायणनारदसंवादे गणपतिखंडे तुलसी
गणेशसंवादो नाम षट्चत्वारिंशोऽध्यायः ॥४६॥ श्रीगणेशार्पणमस्तु ॥ शाके १७०४ वर्षे शुभकृ
तनामसंवत्सरे दक्षिणायने शरदृतौ भाद्रपदकृष्णामावास्यां गुरुवासरे चतुर्थप्रहरे समाप्तं ॥ छ ॥

॥श्री गणेशाय नमः॥ श्री सरस्वत्यै
॥नमः॥ श्रीगुरुभ्यो नमः॥ श्रीराम
॥चंद्राय नमः॥ इति गणपति खंड
॥लिखितं॥ विष्णुखंड स्वहस्तेन बापु
॥भट्टेन लिखितं॥ पत्र संख्या प्रमा
॥ण॥१२॥ ग्रंथसंख्या प्रमाण॥२५६॥
॥हे पुस्तक विठोबा खोंडाचे होय॥

```
[OrderDescription]
,CREATED=06.01.20 10:20
,TRANSFERRED=2020/01/06 at 10:41:21
,PAGES=189
,TYPE=STD
,NAME=S0002449
,Book Name=M-2595-MAHAPURAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
```

```
FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
```

```
FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
```

```
FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
```

```
FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
```

```
FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
```

```
FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
```

```
FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
```

```
FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
```

FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF

```
FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
```

```
FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,
```